
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

१३

॥श्रीगणेशाय नमः॥ श्रीशिवाय नमः॥ ॐकारः सर्ववेदानां सारस्तत्त्वप्रकाश
कः॥ तेन चित्तसमाधानं मुमुक्षूणां प्रकाश्यते॥१॥ आसीदेकं परं ब्रह्मैमुक्तमविक्रियं॥ नित्य २
तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकं॥२॥ तस्मादाकाशमुत्पन्नं शब्दतन्मात्र
रूपकं॥ स्पर्शात्मकस्ततो वायुस्तेजोरूपात्मकं ततः॥३॥ आपो रसात्मिकास्तस्मा
त्ताभ्यो गंधात्मिका मही॥ शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत्॥४॥ शब्दस्पर्श
रूपगुणैस्त्रिगुणं तेज उच्यते॥ शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणाः॥५॥ शब्द
स्पर्शरूपरसगंधैः पंचगुणा मही॥ तेभ्यः समभवत्सूत्रं लिंगं सर्वात्मकं मह
त्॥६॥ ततः स्थूलानि भूतानि पंच तेभ्यो विराड्भूत्॥ पंचीकृतानि भू
तानि स्थूलानीत्युच्यते बुधैः॥७॥ पृथिव्यादीनि भूतानि प्रत्येकं विभजेद्द्वि

Acc. No. ~~1200~~ M-1701
Title - वेदान्तसार - सुबोधिनी.
Author - ~~नृसिंह~~ नृसिंहसरस्वती.
Date - A.D. 1793
Subject - वेदान्त.
Folio - 70
Xerox - 141

बा॰ क॰
१

धा॥ एकैकं भागमादाय चतुर्द्धा विभजेत्पुनः॥८॥ एकैकं भागमेकस्मिन्भू
ते संवेशयेत्क्रमात्॥ ततश्चाकाशभूतस्य भागाः पंच भवंति हि॥९॥ वाय्वादि
भागाश्चत्वारो वाय्वादिष्वेवमाविशन्॥ पंचीकरणमेतत्स्यादित्याहुस्तत्ववेदिनः॥
॥१०॥ पंचीकृतानि भूतानि तत्कार्यं च विराड्भवेत्॥ स्थूलं शरीरमेतत्स्यादशरी
रस्यात्मनः॥११॥ आधिदैवतमध्यात्ममधिभूतमिति त्रिधा॥ एकं ब्रह्म वि
भागेन भ्रमाद्भाति न तत्वतः॥१२॥ इंद्रियै[illegible] विज्ञानं दैवतानुग्रहान्वितैः॥ शब्दा
दिविषयं ज्ञानं तज्जागरितमुच्यते॥१३॥ श्रोत्रमध्यात्ममित्युक्तं श्रोतव्यं शब्दल
क्षणं॥ अधिभूतं तदित्युक्तं दिशस्तत्राधिदैवतं॥१४॥ त्वगध्यात्ममिति प्रोक्तं
स्प्रष्टव्यं स्पर्शलक्षणं॥ अधिभूतं तदित्युक्तं वायुस्तत्राधिदैवतं॥१५॥
चक्षुरध्यात्ममित्युक्तं द्रष्टव्यं रूपलक्षणं॥ अधिभूतं तदित्युक्तमादित्या

२र्थ

श्री
पृ॰ ५
१

आधिदैवतं ॥१६॥ जिह्वाध्यात्मं तपास्वाद्यमधिभूतं रसात्मकं ॥ वरुणो
देवता तत्र जिह्वायामधिदैवतं ॥१७॥ घ्राणमध्यात्ममित्युक्तं घ्रातव्यं गंध
व्युर लक्षणं ॥ अधिभूतं तदित्युक्तं पृथ्व्याधिदैवतं ॥१८॥ वागध्यात्ममिति प्रोक्तं वक्तव्यं अ
पि भिलक्षणं ॥ अधिभूतं तदित्युक्तमग्निस्तत्राधिदैवतं ॥१९॥ हस्तावध्यात्ममित्युक्तमादा
तव्यं च यद्भवेत् ॥ अधिभूतं तदित्युक्तमिंद्रस्तत्राधिदैवतं ॥२०॥ पादावध्यात्ममित्युक्तं त्रा५
गंतव्यं तत्र यद्भवेत् ॥ अधिभूतं तदित्युक्तं विष्णुस्तत्राधिदैवतं ॥२१॥ पा
युरिंद्रियमध्यात्मं विसर्गस्तत्र पोनवेत् ॥ अधिभूतं तदित्युक्तं मृत्युस्त
त्राधिदैवतं ॥२२॥ उपस्थेंद्रियमध्यात्मं स्त्रियाह्लानंदकारणं ॥ अधि

नासिक
३

म्रष्टव्यं तदित्युक्तं मधिदैवं प्रजापतिः ॥२३॥ मनोध्यात्ममिति श्रोत्‌कं मंतव्यम
त्र पद्भवेनू ॥ अधिभूतं तदित्युक्तं चंद्रस्तत्राधिदैवतं ॥२४॥ बुद्धिरध्यात्म
मित्युक्तं बोद्धव्यं तत्र पद्भवेनू ॥ अधिभूतं तदित्युक्तं मधिदैवं बृहस्पतिः ॥२५॥
अहंकारस्तथाध्यात्मं महंकर्तारमेव च ॥ अधिभूतं तदित्युक्तं रुद्रस्तत्राधि
दैवतं ॥२६॥ चित्तमध्यात्ममित्युक्तं चेतव्यं तत्र पद्भवेनू ॥ अधिभूतं त
नदित्युक्तं क्षेत्रज्ञोत्राधिदैवतं ॥२७॥ तमोध्यात्ममितिप्रोक्तं विकार
स्तत्र योगवेनू ॥ अधिभूतं तदित्युक्तमीश्वरोत्राधिदैवतं ॥२८॥ ज्ञाना
तं॰कारमेवं दैवतानुग्रहान्वितेः ॥ सर्वेषां च विधिं पृथ्व ज्ञानं त ज्ञानादितमुच्यते ॥२९॥

नृह
३

र

यं

येऽनागरतां यस्थाऽस्य शरीरं कारणमस्ययं ॥ यस्तु प्रारब्धमानि स्थौ विश्व इत्यभिधीय
ते ॥ रू० ॥ विश्वं वैराजरूपेण पश्यन्भेदमिवर्तीपु ॥ ज्ञानेंद्रियाणि पंचैव पंचक
मेंद्रियाणि च ॥ रू० ॥ श्रोत्रं त्वक्नयनं [illegible] ण जिह्वेंद्रियपंचकं ॥ वाक्पाणिपादं

ने ध्रा

श्री

पायूपस्थाः कर्मेंद्रियपंचकं ॥ रू० ॥ मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयं ॥
संकल्पाख्यं मनोरूपं बुद्धिर्निश्चयरूपिणी ॥ रू० ॥ अभिमानात्मकस्तद्व
दहंकारः प्रकीर्तितः ॥ अनुसंधानरूपं च चित्तमित्यभिधीयते ॥ रू० ॥ प्रा
णोऽपानस्तथा व्यान उदानाख्य एव च ॥ समानश्चेति पंचैताः कीर्तिताः
प्राणवृत्तयः ॥ रू० ॥ ख वाय्वंबुक्षितयो भूतसूक्ष्माणि पंच च ॥ अविद्या

ग्न

5

वार्तिक
२

कामकर्माभिलिंगरूपं एवं विदुः॥३६॥ एतत्स्थूलशरीरं स्यान्मायिकं प्रत्यगात्मनः॥ करणोपरमे जाग्रत्संस्कारोत्थप्रबोधवत्॥ ग्राह्यग्राहकरूपेण स्फुरणं स्वप्न उच्यते॥ अभिमानी तयोर्यस्तु तैजस पदं कीर्तितः॥३८॥ द्विरूपगतं रूपेणाते ज संचितं पंचधा॥ चैतन्याभासखचितं शरीरद्वयकारणं॥३९॥ आत्माज्ञानं तदव्यक्तं अव्याकृतमितीर्यते॥ न सन्नासन्नसदसद्भिन्नाभिन्नं नचात्मनः॥४०॥ न सभागं न निर्भागं न चाप्युभयरूपकं॥ ब्रह्मात्मैकत्वविज्ञानं हेयं मिथ्यात्मकारणात्॥४१॥ लीनानामुपसंहारो हेतुः कारणतो स्थितिः॥ वटबीजे वटस्येव सुषुप्तिरभिधीयते॥४२॥ अभिमानी तयोर्यस्तु प्राज्ञ इत्यभिधीयते॥ जगत्कारणरूपेण प्राज्ञात्मानं विचिन्तयेत्॥४३॥ श्रुति श्रुते

कृष्ण
बुद्धे
२

ज्ञ स सोऽपुष्ट्रि विराट् स्यात्रा क्षरात्सूमिरः॥ विभिन्नमिर् सं मोहाद्वैतं तत्त्वं चिदा
त्मकं॥४४॥ विश्वादिकत्रयं यस्माद्धैरा आदित्रयात्मकं॥ एकत्वेनैव संपन्नये
दन्याभावप्रदूये॥४५॥ ओंकारमात्रमखिलं विश्वप्राज्ञादिलक्षणं॥ वाच्यवा
चकताभेदाद्भेदेनानुपलब्धितः॥४६॥ अकारमात्रं विश्वः स्यादुकारस्तैजसः स्मृ
तः॥ प्राज्ञो मकार इत्येवं परिपश्येत्क्रमेण तु॥४७॥ समाधिकालात्प्रागेवं विचिं
त्यादिप्रयत्नतः॥ स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेत्॥४८॥ अकारं पु
रुषं विश्वमुकारे प्रविलापयेत्॥ उकारं तैजसं सूक्ष्मं मकारे प्रविलापये
त्॥४९॥ मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत्॥ चिदात्माहं नित्यशु
द्धबुद्धमुक्तः सदद्वयः॥५०॥ परमानंदसंदोहवासुदेवोऽहमोमिति॥ ज्ञात्वा

ना॰ कुनिवृत्यवकं चित्ते तस्मात् क्षिप्यते बिलापयेत् ॥५१॥ चिदात्मनि विलीनं चेन्नचि

४ त्तं नैव चालयेत् ॥ पूर्णबोधात्मना सीनः पूर्णाचलसमुद्रवत् ॥५२॥ धो॰३

एवं समाहितो योगी गम्ब्रह्मभक्तिसमन्वितः ॥ जितेंद्रियो जितक्रोधः पश्ये

दात्मानमद्वयं ॥५३॥ आदिमध्यावसानेषु दुःखं सर्वमिदं यतः ॥ तस्मा

त्सर्वं परित्यज्य तत्वनिष्ठो भवेत्सदा ॥५४॥ यः पश्यत्सर्वगं शांतमा

नंदात्मानमद्वयं ॥ न तेन किंचिदाप्तव्यं ज्ञातव्यं वावशिष्यते ॥५५॥ कृ १३ ४

कृतकृत्यो न वै द्विष्टान् जीवन्मुक्तो भवेत्सदा ॥ कदाचिद्व्यवहारेतु द्वै

तपक्षोपलक्ष्यते ॥५६॥ बोधोत्मव्यतिरेकेण न पश्यन्ति किंचिदात्मन्यपात्मा ॥

किंतु पश्यति मिथ्येव न दिङ्मोहे दं कुचिभागवत्॥५७॥ प्रतिभासं त्रादीरस्या
सदाप्रा[illegible]रब्धसंक्षयात्॥ तस्य तावदेव चिरमित्यादि श्रुतिरब्रवीत्॥५८॥
प्रारब्धस्यानुवृत्तिस्तु मुक्तस्याभासमात्रतः॥ सर्वदामुक्त एव स्यात् स्यानत
त्वंपुमानसौ॥५९॥ प्रारब्धभोगद्दोषस्यासंक्षयेन दनं[illegible]तरं॥ अवि घा
तिमिरा[illegible]तातीतं सर्वाभासविवर्जितं॥६०॥ आनंदममलं शुद्धं मनोवा
चामगोचरं॥ वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितं॥६१॥ ज्ञानान
घनमानंदं ध्येहवं पदमश्नुते॥ इदं प्रकरणं यत्नोनृ ज्ञातं येन भवत्त
मे॥६२॥ अमानित्वादिनियमैः गुरुभक्तिप्रसादतः॥ इमां विद्यां प्र

वार्तिक

५

१८

यत्नेन योगी संध्यासु सर्वदा ॥ ६३ ॥ समभ्यस्येदिहामुत्रभोगानासक्तधीः सुधीः ॥ रागद्वेषादि रहितः स्वात्मानं चिंतयेत्सदा ॥ ६४ ॥ ॥ इति श्री सुरेश्वराचार्यकृतं पंचीकरण वार्तिकं संपूर्णं ॥ ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ शके १७१४ परिधावी नाम संवत्सर आषाढ शु० द्वितीया रविदिनी स्वामी स्वामी वार्तिक लिखितं समाप्त ॥ ॥ ॥ विष्णुर्जिन पूजा कर्तव्या ॥ वेदांतश्रवणार्थी तु द्वादशसहस्रजपः ॥ १०१२ योगाभ्यासार्थी तु शतं जपेत् प्रणवेन ॥

॥ पंचीकरण महावाक्य वार्तिक समाप्त ॥ ॥

वा० श्री

५

१८

पु. १०

ध्ययनविं २

श्रीमन्महागणाधिपतये नमः॥ ॐ॥ ज्ञानानंदं गुरुं नत्वा परमानंदमद्वयं॥ वक्ष्ये
वेदांतसारस्य टीकां नाम्ना सुबोधिनीं॥१॥ इह खलु केचिन्महापुरुषा नित्याध्ययनाधी
तसकलवेदराशीनां चिन्मात्राश्रयतद्रूपाद्वयानंदविषयानादिनिर्वचनीयभाव
रूपाज्ञानविलसितानंतभवानुष्ठितकाम्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तो क
पासनाख्यकर्मभिः सम्यक्प्रसन्नेश्वराणामिष्टकाचूर्णादिघर्षितादर्शतलवदतिनि सं
र्मलाशयानां नलिनीदलगतजलबिंदुवद्धिरण्यगर्भादिस्तंबपर्यंतं सात्मवन्नि सि
त्योपास्त्यांतर्गतं क्षणभंगुरं तापत्रयाग्निसंदह्यमानमनिशमात्मन्यनुपश्यतां म
ति विवेकिनामत एव ऐहिकस्रक्चंदनादिविषयभोगेभ्यः आमुष्मिकहिरण्यग
र्भादिपरमभोगेभ्यश्चात्यंततः नवत्यतिनिर्विण्णमानसानां शमादिसाधन
संपन्नानामापाततोऽधिगताखिलवेदार्थानां देहाद्यहंकारपर्यंतजडपदार्थे

तंजीवजातं

।सार·　　　　ङ्गनि २　　　　५　　　　टिप्पु·

तद्विलक्षणस्य प्रकाशस्वरूपप्रत्यगात्मनि अज्ञानेन द्वैतं संशयमापन्नानां तज्जिज्ञा
सूनां अल्पश्रवणेन । मूलाज्ञाननिवृत्ति परमानन्दावाप्तिसिद्धये प्रकरणमारभमा
णः समाप्तिप्रचयगमनादिफलकं शिष्टाचारपरिप्राप्तं इष्टदेवतानमस्कारलक्षण
मंगलाचरणस्य आवश्यककर्तव्यतां प्रदर्शयन् लक्षणया अनुबंधचतुष्टयं च
निरूपयन् परमात्मानं नमस्कुरुते ॥ अखण्डमिति ॥　　॥ अखण्डं सच्चिदानन्दम　　२
१　वाङ्मनसगोचरं ॥ आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥१॥　॥ अभिष्ट
स्य निश्रेयसस्य सिद्धये प्राप्त्यर्थं आत्मानमाश्रये ॥ एकत्वेन प्रतिपाद्यमानस्य अर्थः ॥
नन्वविषयस्यात्मनः कथं प्रतिपत्तिरित्याशंक्याह ॥ अखिलाधारमिति ॥ अखिल
तमकू　स्य चराचरप्रपंचस्य विवर्ताधिष्ठानत्वेन कारणत्वात् तं ब्रह्मैव प्रतिपाद्यत्वेन
लुप्तशब्दमित्यर्थः ॥ नन्वेवं सति प्रतिपत्तिविषयत्वेन दृश्यत्वापत्तिमाशंक्याह ।

ति ३
२ अतातिक्री अन्यथाभावोपि पर्तत ॥

अवाङ्मनसगोचरमिति॥ यतो वाचो निवर्तंते इत्यादिश्रुतिभिरविषयत्वप्रतिपा
दनात्॥ प्रतिपत्तिविषयत्वं कारणोपलक्षितत्वं ब्रह्मविषयत्वेनोपचारिकमिति

ब्रह्मणः भावः॥ ननु एवमपि कारणत्वमस्तीत्युच्यते नित्यत्वशंकामपहरन्नाह सदिति॥ नाशा ६

भावोपलक्षितस्वरूपं॥ सदेव सोम्येत्यादिश्रुतेः॥ ननु तथापि जडत्वापत्तिमाशं

क्य॥ चिदिति॥ स्वप्रकाशचैतन्यस्वरूपमित्यर्थः॥ ननु तथाप्यपुरुषार्थत्वा

त्किमित्याश्रयणीयमित्यत आह॥ आनंदमिति॥ परमानंदमित्यर्थः॥ ननु भासि स्वरूप

तेपि रज्जुसर्पे न शांतो व्याधिरिति न्यायेन प्रपंचस्याधिष्ठानव्यतिरिक्ततया प्रती

यमानत्वात्कथमद्वैतसिद्धिरित्याशंकां तृणीकुर्वन्नाह॥ अखंडमिति॥ सजाती

१२६ यविजातीयस्वगतभेदशून्यमित्यर्थः॥ अत्र सच्चिदानंदमिति प्रयोजनं॥ अखंडमि

ति विषयः॥ शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावसंबंधः॥ तत्कामोधिका

रीत्यनुबंधचतुष्टयमर्थादुक्तं॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते क
थिता ह्यर्थाः प्रकाशंते महात्मनः॥ इत्यादिश्रुत्या गुरुनमस्कारस्यापि शास्त्रांगत्वप्र
भवसं तिपादनात् तन्नमस्कारोपि पृथक्त्वेन कार्य इति तन्नतिपूर्वं क्रमाभिधेयं ग्रंथं प्र
तिजानीते॥ अर्थतेति॥ ॥अर्थतोप्यद्वयानंदानतीतद्वैतभानतः॥ गुरूनारा
ध्य वेदांतसारं वक्ष्ये यथामति॥२॥ ॥अपिशब्दादिच्छादिसंज्ञामात्रं व्यवच्छिद्यते॥ व
२ न केवलं शब्दतः अर्थतः शब्दतश्चेति॥ अद्वयानंदान् गुरून् आराध्य वेदांतसारं २
यथामति वक्ष्ये इत्यन्वयः॥ अद्वयाश्चाते आनंदाश्च अद्वयानंदास्तान्॥ तत्र हेतुमाह॥ भा
अतीतद्वैतभानत इति॥ अतीतं गतं द्वैतभानं यस्मात् अतीतद्वैतभानतः॥ नि गो
रस्तसमस्तभेदज्ञानत्वादित्यर्थः॥ तान् गुरून् आराध्य कायवाङ्मनोभिर्न
मस्कारगोचरीकृत्य वेदांतसारं वेदांतानां उपनिषद्वाक्यजातानां मध्ये यत्सा

अद्वयानंदाः ४

रं सिद्धांतरहस्यं यस्मिन्ज्ञाते पुनर्ज्ञातव्यं नाव[illegible]शिष्यते तं वेदांतसारं यथामति
बुद्धिमौलिकम्यं वक्ष्य इति पाठ इष्ट इत्यर्थः॥ इदानीं सर्वस्यापि वस्तुविचारस्या
दृशापूर्वकत्वात्स्वतिज्ञालं नामतो निर्दिशति॥ ॥वेदांतो नाम उपनिषत्प्रमा
णं॥ ॥तदुपकारीणी शारीरकमीमांसासूत्रादीनि च॥ उपनिषदेव प्रमाणं
उपनिषत्प्रमाणं॥ उपनिषदो यत्र प्रमाणमिति वा॥ तदुपकारीणी वेदांतवाक्य
संग्रहकारिणि शारीरसूत्रादीनि॥ अथातो ब्रह्मजिज्ञासेत्यादीनि सूत्राणि॥
आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यंते॥ तेषामपि उपनिष
छब्दवाच्यत्वादिति भावः॥ ननु यद्यप्यवांतरानुबंधचतुष्टयमाद्यपद्ये नि
र्दिष्टं तथापि परमानुबंधचतुष्टयस्यानिरूपितत्वादत्र प्रेक्षावतां प्रवृत्ति
र्न स्यादित्याह॥ अस्य वेदांतप्रकरणत्वात्तदीयैरेवानुबंधैस्तद्वत्तासिद्धे

नैते प्रथमालोचनीयाः॥ अस्य वेदान्तसारस्येत्यर्थः॥ ननु वेदान्तशास्त्रस्या
पि किमनुबंधचतुष्टयं॥ येनास्यापि तद्वत्ता सिद्धिरित्याशंक्य मूलशास्त्रस्या
नुबंधचतुष्टयमाविष्करोति॥ ॥ तत्रानुबंधो नामाधिकारी विषयसंबंधप्र
योजनानि॥ यथोद्देशमधिकारिणं लक्षयति॥ अधिकारी तु विधिवदधीत
वेदवेदांगत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन्जन्मनि जन्मांतरे वा काम्य
निषिद्धवर्ज्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनि
खिलकल्मषतया नितांतनिर्मलस्वांतः साधनचतुष्टयसंपन्नः प्रमाता॥ ॥
अध्ययनं विधिप्रयुक्तमेवाध्ययनं॥ नाध्यापनविधिप्रयुक्तं॥ तथा च॥
अधीतानि वेदवेदांगानि च शीक्षाकल्पो व्याकरणं छंदो ज्योतिषं निरुक्तमाख्या
नि पतत्स्तनः प्रापा [illegible] ततोऽधिगताखिलवेदार्थः॥ अत्र सर्वे वेदार्थे
स्वाध्यायोऽध्येतव्य इति विधिना त्रैवर्णिकानामुपनीतानामध्ययनं नियमेन विधीयते

हस्य ज्ञाने सति उत्तरग्रंथवैयर्थ्यपरिहारायापातत इत्युक्तं॥ ननु अनधीत
वेदानामपि विदुरादीनां तत्वज्ञानोत्पत्तिदर्शनादध्ययनतत्प्रयुक्तकर्मानुष्ठानवै
यर्थ्यमाशंक्य तत्रमाह॥ जन्मान्तरेति॥ तेषामाधुनिकाध्ययनाद्यभावेपि ज
न्मांतरीयाध्ययनादीनां चित्तपरिपाकवतामस्मिन्जन्मनि विनाप्यध्ययनादीना
ज्ञानोत्पत्तौ बाधकाभावात्॥ नाध्ययनादिवैयर्थ्यमिति भावः॥ काम्येति॥ का
म्यस्यापि कर्मणः धर्मसाधनत्वेपि यातायातसंपादकत्वेन बंधकत्वान्निषिद्ध
वत्॥ तद्वर्जनपुरःसरमित्युक्तं॥ तथापि नित्यादिकर्मानुष्ठानेन निर्गतनिखि
लकल्मषतया निःशेषनिरस्तसकलकल्मषत्वेनाखिलपदं काम्यनिषिद्ध
जनितसुकृतदुःकृतपरं तेन नितांतनिर्मलस्वांतः नितांतमत्यंतं निर्मलं स्वं
स्वांतमंतःकरणं यस्य स तथोक्तः॥ वक्ष्यमाणसाधनचतुष्टयसंपन्नः प्रमा

ता॥ अंतःकरणप्रतिबिंबितचैतन्यमित्यर्थः॥ एतेषां स्वरूपं व्याकरोति॥ ॥ काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि॥ निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि॥ नित्यान्यकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि॥ नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि॥ प्रायश्चित्तानि पापक्षयमात्रसाधनानि चांद्रायणादीनि॥ उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शांडिल्यविद्यादीनि॥ एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनं॥ उपासनानां तु चित्तैकाग्र्यं॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुतेः॥ तपसा कल्मषं हंतीत्यादिस्मृतेश्च॥ नित्यनैमित्तिकप्रायश्चित्तोपासनानां त्ववांतरफलं पितृलोकसत्यलोकप्राप्तिः॥ क्रमेण

वनितादि ४

पितृलोकोविद्यया देवलोक इत्यादिश्रुतेः॥ साधनानि॥ नित्यानित्यवस्तुविवे
केहामुत्रार्थफलभोगविरागशमदमादिषट्कसंपत्तिमुमुक्षुत्वानि॥ नित्यानि
त्यवस्तुविवेकस्तावत्॥ आत्मैव नित्यं वस्तु ततोन्यदखिलमनित्यमिति वि
वेचनं॥ ऐहिकानां स्रक्चंदनविषयभोगानां कर्मजन्यतयानित्यवदामुष्मि
काणामपि अमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिः
इहामुत्रफलभोगविरागः॥ शमादयस्तु शमदमोपरतितितिक्षासमाधा
नश्रद्धाख्याः तत्र शमस्य लक्षणमाह॥ शमस्तावत् श्रवणादिव्यतिरिक्तवि
षयेभ्यो मनसो निग्रहः॥ यथातीव्रायां बुभुक्षायां जातायां भोजनादन्यो
व्यापारो मनसो न रोचते भोजने च विलंबं न सहते तथास्रक्चंदनादिवि
षयेषुत्यंतमरुचिः॥ तत्त्वज्ञानसाधनेषु श्रवणमननादिष्वत्यंतमभिरु

19

।विर्यदा जायते तदापूर्ववासनाबलाच्छ्रवणादिसाधने[illegible]भ्यः उद्धीय स्रक्
चंदनादिविषयेषु गम्यमानं मनः येनांतःकरणवृत्तिविशेषेण निगृह्यते स वृ
त्तिविशेषः शम इत्यर्थः॥ इदानीं दमस्य लक्षणमाह॥ दमो बाह्येंद्रियाणां तद्व्य
तिरिक्तविषयेभ्यो निवर्तनं॥ ज्ञानसाधनश्रवणादिसाधनेभ्यो विलक्षणेषु श
ब्दादिविषयेषु प्रवर्तमानानि श्रोत्रादीनि बाह्येंद्रियाणि येन वृत्तिविशेषेण
निवर्त्यंते स दम इत्यर्थः॥ इदानीमुपरतेर्लक्षणमाह। निवर्तितानामेतेषां त
द्व्यतिरिक्तविषयेभ्यः उपरमणमुपरतिः॥ निगृहीतानां तेषामेव बाह्येंद्रि
याणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानींद्रिया
णि सर्वथा न गच्छंति तथा तेषां निग्रहो येन वृत्तिविशेषेण क्रियते सा उपर
तिरित्यर्थः॥ उपरतेर्लक्षणांतरमाह॥ अथवा विहितानां कर्मणां विधिना

परित्यागः॥ विहितानां नित्यादिकर्मणां विधिना चतुर्थाश्रमस्वीकारक्रमेण प
रित्यागः॥ नाहं कर्तेत्यवस्थानमुपरतिरित्यर्थः॥ तितिक्षायाः लक्षणमाह॥
तितिक्षा शीतोष्णादिद्वंद्वसहिष्णुता॥ शरीरधर्मस्य शीतोष्णादेस्तज्जन्यसुखदुःखा
र देश्च शरीर एव तूत्पन्नत्वमशक्यत्वात् स्वप्रकाशचिद्रूपस्वात्मनि च शीतोष्णादेरत्यंता
भावादिति विवेकदीपनमिथ्याभानस्य शीतोष्णादिद्वंद्वस्य यत्सहनं सा तिति
स क्षेत्यर्थः॥ इदानीं समाधानस्य लक्षणमाह॥ निगृहीतमनसः श्रवणादौ तदनु स्य
गुणविषये च समाधिः समाधानं॥ शब्दादिविषयेभ्यो निगृहीतस्यांतःकर
णस्य श्रवणादौ तदनुगुणे[illegible]षु तदनुकूलेषु अमानित्वादिसाधनविष नि
येषु समाधिः नैरंतर्येण नद्धितनं समाधानमित्यर्थः॥ श्रद्धायाः स्वरूपमाह॥
गुरुवेदांतवाक्येषु विश्वासः श्रद्धा॥ मुमुक्षुत्वं मोक्षेच्छा॥ एवंभूतः प्रमाता अधि

कारी॥ तथा च पूर्वोक्तसकलविशेषणविशिष्टप्रमाताऽधिकारीत्यर्थः॥ अस्मि
न्नर्थे श्रुतिं प्रमाणयति॥ शांतो दांत इति श्रुतेः॥ उक्तं च॥ प्रशांतचित्ताय जितेंद्रि
याय प्रहीणदोषाय यथोक्तकारिणे॥ गुणान्वितायानुगताय सर्वदा प्रदेयमेत
त्सततं मुमुक्षवे इति॥ यथोद्देशं विषयं निरूपयति॥ विषयो जीवब्रह्मैक्यं शु
द्धचैतन्यं प्रमेयं तत्रैव वेदांतानां तात्पर्यात्॥ अविद्याध्यारोपितसर्वज्ञत्वकिं
चिज्ज्ञत्वादिविरुद्धधर्मपरित्यागेनावशिष्टं शुद्धचैतन्यं ज्ञेयस्वरूपमेव॥ सर्वेषां
वेदांतवाक्यानां विषय इत्यर्थः॥ क्रमप्राप्तं संबंधं लक्षयति॥ संबंधस्तु॥ त
दैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभा
वलक्षणः॥ बोध्यबोधकभाव इति बोध्यस्य ब्रह्मात्मैक्यस्वरूपस्य बोध
कस्य वेदांतशास्त्रस्य च बोधकभाव एव संबंध इत्यर्थः॥ अवशिष्टप्रयो

बोध्य

जनमोहः॥ प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानंदावा
प्तिश्च॥ ब्रह्मात्मैकत्वलक्षणचिन्मात्रगताज्ञानतत्कार्यसकलप्रपंचनिवृ
त्तिः॥ पुनरुत्पत्त्यभावरूपस्वस्वरूपाखंडानंदप्राप्तिफलमित्यर्थः॥ ननु
लोके प्राप्तस्य क्रियासाध्यस्य स्वर्गादेः पुरुषार्थत्वेन फलत्वं दृष्टं॥ अत्र तु
नित्यप्राप्तस्यात्मस्वरूपस्य क्रियासाध्यत्वाभावेन पुरुषार्थत्वाभावात्क
थं फलत्वमिति चेन्न॥ तस्यैव पुरुषार्थमिति नियमाभावात् यथा लोके कस्य
चिद्विस्मृतकंठमणेः स्वस्य युक्तशोकाग्निसंदह्यमानस्याप्तोपदेशात्तत्का
ल स्वकंठगतचामीकरप्राप्तेरपि पुरुषार्थत्वात्फलत्वं दृष्टं॥ एवमत्रापि नि
त्यप्राप्तस्यात्मनः अज्ञानमोहांधकारनिवृत्तौ न विस्मृतस्वस्वरूपस्य गुरुश्रुतिवाक्य
श्रवणानंतरमज्ञानमोहांधकारनिवृत्तौ सत्यां स्वयंप्रकाशमानचिद्रूपस्य

सिद्धस्यात्मनः फलत्वमुपचर्यत इति भावः ॥ उक्तार्थे श्रुतिं प्रमाणयति ॥ तरति
शोकमात्मवित् ब्रह्मविद्ब्रह्मैव भवती इत्यादिश्रुतेः ॥ अधुना शास्त्रारंभनिमि
त्ताधिकार्यादि निरूपणानंतरं [illegible] शास्त्रारंभं प्रस्तौति ॥ अ
थवा कथं तस्याधिकारिणः कर्तव्यं दर्शयति ॥ अयमधिकारी जननमरणादि
संसारदावानलसंतप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनि
ष्ठं गुरुमुपसृत्य तमनुसरति ॥ उक्तलक्षणलक्षितो बुद्धिसंन्निहितोऽधिकारी गु
रुमनुसर[illegible]तीति संबंधः ॥ ननु संसारसक्तचित्तस्य विषयलोलुपस्याधिकारि
स्य गुरूपसर्पणमयुक्तमित्याशंक्याह ॥ संसा[illegible]रानलसंतप्त इति ॥ संतापहेतुमो
हजननेति ॥ आदिशब्देन व्याध्यादयो गृह्यंते ॥ संतप्तस्यैव गुरूसर्पणमित्य
त्र दृष्टांतमित्याह ॥ दीप्तशिरा इति ॥ यद्वद्दग्धमस्तको दाहनिवृत्तिकामो

१ १ प

स्सटलियथाशीतलं जलराशिमनुसरति॥ तथासंसारतापदह्यमानस्तन्निवृ
त्तिकामः स्वस्वरूपजिज्ञासुः संसारनिवर्त्तकं श्रोत्रियं ब्रह्मनिष्ठं करतलामलकव
त्स्वप्रकाशात्मस्वरूपसमर्पकं गुरुसमीपं गत्वाऽनुसरति॥ मनोवाक्कायकर्मभिः
सेवतइत्यर्थः॥ अस्मिन्नर्थे श्रुतिमुदाहरति॥ समित्पाणिः श्रोत्रियमित्यादिश्रु
तेः॥ अथगुरुकृत्यमाह॥ पूर्वोक्तो गुरुरेनं शिष्यं उपदिशति॥ सपरमकृपयाऽ
पा ध्यारोपवादं न्यायेनैनमुपदिश तीत्याह कृपयेति॥ कृपाव्यतिरिक्तसाधनां
तराभावादित्यर्थः॥ ननु अखंडस्य ब्रह्मस्वरूपस्यागोचरत्वेन उपदेष्टुमशक्य
त्वात्कथमुपदिशतीत्यत आह॥ अध्यारोपेति॥ अखंडब्रह्मस्वरूपस्य विधिमु
खेनोपदेष्टुमशक्यत्वेपि नेह नानास्ति किंचनेत्यादिश्रुतिमनुसृत्य अविद्या

मुखेनोप

रोपित मिथ्यानानापदार्थनिषेधोपलक्षितमखण्डचैतन्यमेव पुनः सत्यं ज्ञानम
नन्तं ब्रह्मेत्यादिश्रुतिमनुसत्यलक्षणयावि[illegible]धमुखेन [illegible]पदिशातीतिभा
वः। परमरहस्यमपि ब्रह्मस्वरूपं कस्मादुपदिशातीत्याह॥ तत्रश्रुतिमाह॥ तस्मै
सविद्वानुपसन्नायप्राहेत्यादिश्रुतेः॥ अस्मिन्नर्थे लौकिकदृष्टान्तमाह॥ असर्प
भूतायां रज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोपोऽध्यारोपः॥ व्यावहारिकवस्तु
त्वेनाभिमतायां रज्जौ अवस्तुभूतसर्पारोपो नाम रज्ज्ववच्छिन्न चैतन्यस्थाऽवि
द्या सर्पज्ञानाभासाकारेण परिणममाणा सर्पाकारेण विवर्तते॥ स विवर्तो रज्ज्व
वच्छिन्नचैतन्यनिष्ठाविद्योपादानत्वेन नायं सर्पः किंतु रज्जुरिति॥ विशेषद
र्शनोत्तरकालीनाधिष्ठान रज्जुसाक्षात्कारेण रज्ज्वज्ञाननिवृत्तौ सर्पभ्रान्ति

८

निवर्तत इत्यर्थः ॥ उक्तार्थं दार्ष्टान्तिके योजयति ॥ वस्तु सच्चिदानन्दाद्वयं ब्रह्म ॥ काल
त्रयानपाय्यात्मैव वस्तुशब्दार्थः ॥ तत्रावस्तुस्वरूपमाह ॥ अज्ञानादिसकलजड
समूहोवस्तु ॥ अज्ञानं तज्जन्यव्योमादि मिथ्यात्वाद्दृश्यत्वात्सावयवत्वाद्विकारित्वा
त्सापेक्षकत्वादिहेतुभिरवस्तुत्वमित्यर्थः ॥ एतदेव विस्तारेण प्रतिपादयितुमज्ञा
नस्वरूपं तावदाह ॥ अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानवि
रोधिभावरूपं यत्किंचिदिति वदन्ति ॥ किमिदमज्ञानं सद्रूपमसद्रूपं वा ॥ नाद्यः
तस्य शशविषाणतुल्यत्वेन तुच्छत्वात् ॥ नापि द्वितीयः ॥ असतः कारणत्वानु
पपत्तेरित्यादिहेतुभिः ॥ सत्त्वेनासत्त्वेनापि निरूपयितुं न शक्यत इत्याह ॥ अ इति
निर्वचनीयमिति ॥ ननु ज्ञानस्यानिर्वचनीयत्वे सर्वथा ज्ञातुमशक्यत्वाच्च

द्भावप्रसंगमाशंक्याह॥ त्रिगुणात्मकेति॥ अजामेकामित्यादिश्रुतिभिः॥ सत्वर
जस्तमोगुणात्मकत्वप्रतिपादनादित्यर्थः॥ नन्वेवमजस्याज्ञानस्य श्रुतिप्रसिद्धस्य
व्योमादिरूपेण विततस्य सत्ववद्भासमानत्वेन संसारनिवृत्तिमित्याशंक्याह॥ ज्ञा
नविरोधीति॥ एतादृशमप्याज्ञानमात्मसाक्षात्कारेण निवर्त्तत इत्यर्थः॥ तदुक्तं
भगवता॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया॥ मामेव ये प्रपद्यंते मायामे
तां तरंति ते॥ इति॥ ज्ञानाभाव एवाज्ञानमिति तार्किकमतं निराकरोति॥ भावरू
पमिति॥ त्रिगुणात्मकभावरूपत्वेपि इदमित्थमिति पिंडीकृत्य प्रदर्शयितुमश
क्यत इत्याह॥ यत्किंचिदिति॥ किमप्यघटितघटनापटीयसीत्यर्थः॥ अनिर्व
चनीयानादिभावरूपाज्ञानसद्भावेऽनुभवमेव प्रमाणत्वेन दर्शयति॥ अहमज्ञ
इत्यनुभवात्॥ अहमज्ञो मामहं च न जानामीत्यपरोक्षाभावं स एव प्रमाण

टे३

मनेक च

मित्यर्थः ॥ तस्यैवोपहितं भक्तत्वेन श्रुतिमुदाहरति । देवात्मशक्तिं स्वगुणैर्निगूढामित्या
दिश्रुतेश्च इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकत्वमिति व्यपदिश्यते ॥ वस्तुतो
च ज्ञानस्यैकत्वेपि समष्ट्यभिप्रायेणैकमिति व्यवह्रियते । व्यष्ट्यभिप्रायेणानेक
प्रति मित्यर्थः ॥ एतदेव प्रपंचयितुं जानीते ॥ तथाहि ॥ यथा वृक्षाणां समष्ट्यभिप्रायेण
वनमित्येकत्वव्यपदेशः ॥ यथा जलानां समष्ट्यभिप्रायेण जलाशय इति ॥ तथा ना
ना नात्वेन प्रतिभासमानानां जीवगतानामज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यप
देशः ॥ यथा बहूनां वृक्षाणां समुदायविवक्षया वनमित्येकत्वव्यपदेशः ॥ यथा
बहूनां घटादिजलानां समुदायविवक्षया जलाशय इत्येकत्वव्यपदेशः ॥ तथान्तः
करणोपाधिभेदेन नानात्वेन प्रतीयमानानां जीवगताज्ञानानां समुदायवि
वक्षया अज्ञानमित्येकत्वव्यपदेश इत्यर्थः ॥ अस्मिन्नर्थे श्रुतिं प्रमाणयति ॥

अजामेकामित्यादिश्रुतेः॥ नानाजीवगतानिकृष्टांतःकरणव्यष्ट्युपाध्यपेक्षया
समष्ट्युपाधेरस्य वैलक्षण्यं दर्शयति॥ इयं समष्टिरुत्कृष्टोपाधितया विशुद्धस
त्वप्रधाना॥ वीतरागादिदोषसकलकार्यप्रपंचस्य जगत्कारणभूतस्याज्ञान
स्य समष्टिभूतोत्कृष्टोपाधित्वेन विशुद्धसत्वप्राधान्यमिति भावः॥ एतत्सम
ष्ट्युपाधिद्वारेणेश्वरचैतन्यं लक्षयति॥ एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेनि
यंतृत्वादिगुणकमव्यक्तमंतर्यामिजगत्कारणमीश्वरइतिचव्यपदिश्यते॥
एतत्समष्ट्यज्ञानोपलक्षितं चैतन्यं सर्वगुणस्य चराचरात्मकप्रपंचस्य साक्षि
त्वेन सर्वज्ञत्वइत्युच्यते॥ [illegible] सर्वेषां जीवानां [illegible]॥
कर्मानुरूपईशितृत्वेन फलदातृत्वेनेश्वरइत्युच्यते॥ तथासर्वेषां जीवानां
प्रेरकत्वेन नियंतेत्युच्यते॥ प्रामाण्यागोचरत्वादव्यक्तमित्युच्यते॥ सर्वेषां

जीवानामन्तर्हृदये स्थित्वा बुद्धिनियामकत्वेनांतर्यामीत्युच्यते॥ सर्वस्य चराच
रात्मकस्य प्रपंचस्य विवर्ताधिष्ठानत्वेन जगत्कारणमिति व्यपदिश्यत इत्यर्थः॥
उक्तार्थे युक्तिमाह॥ सकलाज्ञानावभासकत्वात्॥ अत्र प्रमाणमाह॥ यः सर्वज्ञः
सर्वविदित्यादिश्रुतेः॥ इदानीं तस्यैवेश्वरस्य समुदायोपाधिरेव कारणशरीरत्वमा
नंदमयकोशत्वं सुषुप्त्यवस्थाविशिष्टत्वं चेत्याह॥ ईश्वरस्येयं समष्टि
रखिलकारणत्वात्कारणशरीरमानंदप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानंद
मयः कोशः॥ कारणशरीरत्वे हेतुमाह॥ अखिलेति॥ आनंदमयत्वे हेतुमाह॥
आनंदप्रचुरत्वादिति॥ कारणत्वावस्थायां प्रकृतिपुरुषमात्रव्यतिरिक्तस्य
स्थूलकार्यप्रपंचस्यैवाभावादानंदबाहुल्यमिति॥ कोशत्वे युक्तिमाह॥
आच्छादकत्वादिति॥ शारीराच्छादकचर्मवच्छादकत्वादज्ञानकोश इति व्य

वहार इत्यर्थः॥ ननु तथापि कारणत्वोपाधेरज्ञानस्य सुषुप्तित्वं कुत इत्यत आह॥
सर्वोपरमत्वात्सुषुप्तिः॥ सर्वस्य स्थूलसूक्ष्मोपाधेः कारणत्वोपाधौ लीनत्वात्सु
षुप्तित्वमित्यर्थः॥ ननु स्थूलसूक्ष्मप्रपंचलयस्थानस्य कथं सुषुप्तित्वमित्याशंक्य
आह॥ संज्ञाभेदान वस्तुभेद इत्याह॥ अत एव स्थूलसूक्ष्मप्रपंचलयस्थान
मितिचोच्यते॥ यतः कारणत्वात्सुषुप्तित्वं॥ अत एव पंचीकृतस्थूलप्रपंचस्य
जाग्रदवस्थाविशिष्टस्यापंचीकृतकार्यस्य सूक्ष्मस्थूलप्रपंचस्य लयस्थान
मितिव्यवह्रियत इत्यर्थः॥ समष्टिरूपमज्ञानं सप्रपंचं निरूप्येदानीं व्यष्टिभूता
ज्ञानं निरूपयितुं दृष्टांतौ वै दर्शयति॥ यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्य
नेकत्वव्यपदेशः॥ यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तदनेकत्वव्य
पदेशः॥ तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः॥ यथावद्वृक्ष

ता

११

समुदायस्य वनत्वेन रूपेणैकत्वव्यवहारेपि प्रत्येकं वृक्षविवक्षया चूतादयो
बहवो वृक्षास्तिष्ठंतीति बहुत्वव्यवहारः॥ यथा वापीकूपतडागनद्यादिषु समु
दायविवक्षया जलाशय इत्येकत्वव्यवहारेपि प्रत्येकं वाप्यादिविवक्षया बहूनि
जलानि तिष्ठंतीति बहुत्वव्यवहारः॥ तथा सकलप्रपंचकारणस्याज्ञानस्य समु
दायरूपेणैकत्वेप्यहंकारादिकारणभूतानां जीवगताज्ञानानां प्रत्येकं विवक्ष
या बहुत्वव्यवहार इत्यर्थः॥ अस्मिन्नर्थे श्रुतिं प्रमाणयति॥ इंद्रो मायाभिः पुरु
रूप ईयत इति श्रुतेः॥ ननु तथापि एकस्यैवाज्ञानस्य तत्तद्वृत्तित्वेनैकस्य वा व्य
ष्टिसमष्टिता कुत इत्यत आह॥ अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिता
व्यपदेशः॥ भेदविवक्षया व्यष्टित्वं मृत्घटादिवत् अभेदविवक्षया समष्टि
त्वम् मृत्पिंडवदित्यर्थः॥ तत्र महाप्रलयकालीनव्यष्ट्युपाधिभूतजीवप्रसूते
समष्ट्युपाधिभूतविशुद्धसत्वप्रधानायामूलप्रकृतेः सकाशात् दैनंदिनप्रलयकालीन = १

र्थं दर्शयति॥ इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्वप्रधाना॥ इयं जीवोपाधि
सुषुप्त्यवस्थापन्नाहंकारादिविक्षेपसंस्काररूपा निकृष्टोपाधित्वेन मलिनसत्व
प्रधानत्वेत्यर्थः॥ अनेनोपाधिना प्राज्ञचैतन्यं लक्षयति॥ एतदुपहितं चैतन्य
मल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते॥ अत्रोपपत्तिमाह॥ एकाज्ञाना
वभासकत्वात्॥ ईश्वरगतमूलाज्ञानस्य जीवगताहंकारादिविक्षेपसंस्कार
 रूपाज्ञानस्य च वस्तुतः एकत्वेन तदवभासकेश्वरजीवचैतन्ययोरप्येकत्वमि
त्यर्थः॥ सोऽपि जीवचैतन्यस्य प्राज्ञत्वं साधयति॥ अस्य प्राज्ञत्वमस्पष्टोपा
धितया नातिप्रकाशकत्वादस्यापीयमहंकारादिकारणत्वात्कारणशरीर
मानंदप्रचुरत्वादेव हेतोरानंदमयः कोशः॥ संस्काररूपास्पष्टोपाधित्वेन
यातत्वाच्च तत्त्वेनातिप्रकाशकताभावात्प्राज्ञत्वमस्येत्यर्थः॥ यथाजगत्कार

णेश्वरोपाधेः कारणशरीरत्वमानंदप्रचुरत्वेन चानंदमयकोशत्वं कोशादृष्टांतेन च
कोशत्वं तथा एतत्सर्वं तारतम्येन प्राज्ञस्यैतन्येष्वतिदिशति॥ अहंकारादिति।
प्रलयकाले हिरण्यगर्भादिप्रपंचोत्पादकेश्वरगतमूलप्रकृतिवत्सुषुप्तिकाले ऽ
हंकारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणश-
रीरत्वं॥ इंद्रियतद्विषयाभावेन व्यासंगाभावादानंदबाहुल्यादात्मच्छादकत्वात्को-
शत्वं च युज्यत इति भावः॥ ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिपद-
वाच्यत्वमित्याशंक्य पूर्ववत्संज्ञाभेदो न वस्तुभेद इति वक्तुं तत्र युक्तिमित्याह।
सर्वोपरमत्वात्सुषुप्तिः अत एव स्थूलसूक्ष्म[illegible]शरीरलयस्थानमिति चोच्य-
ते॥ पंचीकृतस्थूलशरीरस्य व्यवहारिकस्यापंचीकृते सूक्ष्मशरीरे प्रातिभासिके
प्रविलापयितव्यात्तस्यापि प्रातिभासिकस्य स्वप्नप्रपंचस्य कारणाज्ञाने लीनत्वात्स-

वैपरीत्यमित्यर्थः ॥ तथाचोक्तं ॥ लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरंगके ॥ तस्यापि विलये नीरे तिष्ठंत्येते यथापुरा ॥ व्यावहारिकजीवस्य लयं स्यात्प्राज्ञलिंगके ॥ तल्लये सच्चिदानंदाः पर्यवस्यंति साक्षिणीति ॥ ननु प्रलयकाले सुषुप्तिकाले अंतःकरणतद्वृत्त्यभावेन आनंदग्राहकाभावादानंदप्राचुर्यसद्भावे प्रमाणाभावमाशंक्य परिहरति ॥ तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः ॥ यथा स्वच्छत्वेनांतःकरणस्य वृत्तिरंगीक्रियते तथा चैतन्यप्रदीप्ताज्ञानस्यापि सूक्ष्मा वृत्तयः स्वीक्रियंते तथा च ईश्वरः स्वकीयाज्ञानवृत्तिभिः स्वात्मानंदबाहुल्यमनुभवति ॥ जीवोपि संस्कारमात्रावशिष्टातिशयाज्ञानवृत्तिभिः स्वात्मानंदबाहुल्यमनुभवतीति भावः ॥ अत्रैवोपष्टंभकत्वेन श्रुतिमवतारयति ॥ आनंदभुक्चेतोमुखः प्राज्ञ इत्यादिश्रुतेः ॥ उत्तरकालीनसुखपरामर्शानुपपत्तिरपि पूर्वानुभूत

सुखवाहृत्ताअनुभावसद्भावे प्रमाणमित्याह ॥ सुखमहमस्वाप्सं न किंचिदवेदिषं
इत्युत्थितस्य परामर्शोपपत्तेश्च ॥ सुखमहमस्वाप्समित्यानंदपरामर्शः ॥ तथाच
सुषुप्तिदशायां प्रलयकालेच प्राज्ञेश्वरावज्ञानवृत्तिभिरानंदमनुभवत एवेत्यर्थः ॥
इदानीमीश्वरगतमूलाज्ञानस्य जीवगतसंस्कारविशिष्टाज्ञानस्य च समष्टिव्यष्टिरूपाभि मात्रा
प्रायेण भेदभानेपि वस्तुभेदो नास्तीत्येतत्सदृष्टांतमाह ॥ अनयोर्व्यष्टिसमष्ट्योर्वनवृ
क्षयोरिव जलाशयजलयोरिवाभेदः । उक्तोपाधिद्वयकारेणेश्वरप्राज्ञयोरप्यभेदं दृ
ष्टांतमुखेन दर्शयति ॥ एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरि
व जलाशय [illegible] जलगतप्रतिबिंबाकाशयोरिवाभेदः ॥ ईश्वरस्य वनावच्छि
न्नाकाशवत्प्राज्ञस्य वृक्षावच्छिन्नाकाशवच्च ॥ कारणोपाध्यवच्छिन्नेश्वरस्य कार्यो
पाध्यवच्छिन्नप्राज्ञस्य च वस्तुनोऽभेद एवेत्यर्थः ॥ अत्र प्रमाणमाह ॥ एष सर्वेश्वर इत्या
तथा स्थूलजलाशयोपाध्यवच्छिन्नाकाशवत्तज्जलगतप्रतिबिंबाकाशवच्च ॥ २

दिश्रुतेः। तथा चोक्तमाचार्यैः॥ कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः॥ कार्यकारणतां
हित्वा पूर्णबोधोऽवशिष्यते॥ इति॥ उपाधिद्वयावच्छिन्नौ प्राज्ञेश्वरौ सप्रपंचं निरूप्येदानीम
नवच्छिन्नं तुरीयं यच्चैतन्यं लक्षयति॥ वनवृक्षतदवच्छिन्नाकाशयोर्जलगतप्रति
बिंबाकाशयोर्वा आधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययो
राधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते॥ यथा स्थूलवनोपाध्यव

च्छिन्नाकाशापेक्षया सूक्ष्मवृक्षोपाध्यवच्छिन्नाकाशापेक्षया च महाकाशस्य
तदुभयाधारतया अनवच्छिन्नत्वाच्च तुरीयत्वं यथा कार्यकारणोपाधितया चैत
न्य द्वयापेक्षया तदाधारभूतं यदनवच्छिन्नं सर्वव्यापि चैतन्यं विशुद्धं तत्तु
रीयमित्युच्यते त्यर्थः॥ अस्मिन्नर्थे श्रुतिः संवादयति॥ शिवं शान्तमद्वैतं चतुर्थं
मन्यंते इत्यादिश्रुतेः॥ एतदेव विशुद्धचैतन्यं तदैक्यं पूर्वोक्तचैतन्यद्वयेन सहैक

विविक्तं

त्वविवक्षया महावाक्यस्य वाच्यत्वं लभते॥ भेदाविवक्षया च लक्ष्यत्वं लभत इत्या
ह॥ इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिण्डवदवि
विक्तं सन्महावाक्यस्य वाच्यं सल्लक्ष्यमिति चोच्यते॥ त्रयाणां चैतन्यानां चैतन्यत्वे
न रूपेणैकत्वेपि अवच्छिन्नानवच्छिन्नत्वेन रूपेण वाच्यत्वलक्षणत्वे संभवत इति भा
वः॥ अथेदानीं स्वप्रकाशचिद्रूपस्यात्मनः कथं कुण्ठितप्रकाशत्वं कथं वा संगोदासीन त्वं
स्यात्मनः आकाशादिप्रपंचजनकत्वमित्येतन्महाविरोधपरिहारायाज्ञानस्य शक्ति
द्वयं निरूप्यते॥ अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयं॥ तेनैव ना
शक्तिः- मतो निर्दिश्यते॥ आवरणविक्षेपतावर॥ सच्चिदानंदस्वरूपमावृणोतीत्याव
रणशक्तिः॥ ब्रह्मादिस्तम्बपर्यन्तं जगद्बुद्बुदवन्नामरूपात्मकं विक्षिपति सृजती
ति विक्षेपशक्तिरिति शक्तिद्वयमज्ञानस्येत्यर्थः॥ नन्वपरिच्छिन्नस्य स्वप्रकाशचिद्रू

६

पाखंडपरिपूर्णस्य स्वरूपस्यात्मनः परिच्छिन्नेनानित्येन जडत्वमोरूपेणाव्यापके
नाज्ञानशक्तिविशेषेण कथमावरणमित्याशंक्य वस्तुतोऽज्ञानस्यात्माच्छाद
कत्वाभावेपि प्रमातृबुद्धिमात्राच्छादकत्वाज्ज्ञानस्यात्माच्छादकत्वमुपचारादुच्य ८
तइत्याह॥ अल्पोपि मेघोऽनेकयोजनायतमादित्यमंडलमवलोकयितृनयन
पथपिधायकतयायथाच्छादयतीव॥ तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्न
१५ मसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव॥ तादृशं सामर्थ्यमू। १५
यथाल्पोपि मेघोऽनेकयोजनविस्तीर्णमादित्यमंडलमवलोकयितृपुरुषदृष्टि
मात्राच्छादकत्वेनादित्यमाच्छादयतीत्युपचर्यते तथातितुच्छपरिच्छिन्नमप्या
ज्ञानं प्रमातृबुद्धिमात्राच्छादकेनात्मानमाच्छादयतीत्युपचारादुच्यतइत्यर्थः॥
अस्मिन्नर्थे वृद्धसम्मतिमाह॥ तदुक्तं॥ घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्य

तेनिः प्रभं वातिमूढः॥ तथाबद्धवद्भातियो मूढदृष्टेः सनित्योपलब्धिः स्वरूपोहमा
त्मा इति॥ अनयैवावरणशक्त्याछिन्नस्यात्मनः कर्तृत्वभोक्तृत्वदुःखित्वादि संसा
रसंभवेन नापि संभाव्यते॥ इयमेव॥ आवरणशक्तिरात्मनो भेदबुद्धिजनकत्वेन
संसारहेतुरितिभावः॥ अत्रानुरूपदृष्टांतमाह॥ यथास्वाज्ञानेनावृतायां रज्ज्वांस
र्पत्वसंभावना॥ तदुक्तमसंगस्योदासीनस्यात्मनः कथं जगत्कारणत्वमिति तन्नि
राकर्तुं विक्षेपशक्तिमाह॥ विक्षेपशक्तिश्च॥ यथा रज्ज्वज्ञानं स्वावृतायां रज्जौ स्व
शक्त्यासर्पादिकमुद्भावयति॥ एवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्या आ अनया॥
काशादिप्रपंचमुद्भावयति॥ तादृशं सामर्थ्यं॥ यथा रज्जुविषयकमज्ञानं सर्प
मुद्भावयति॥ तथात्मविषयकमज्ञानमपि स्वाछिन्ने आत्मनि विक्षेपशक्तिप्र
भावेन आकाशादिकप्रपंचमुत्पादयतीत्यर्थः॥ अस्मिन्नर्थे ग्रंथांतरसंवादं दर्शि

यति॥ तदुक्तं विक्षेपशक्तिर्लिंगादि ब्रह्मांडांतं जगत्सृजेत्॥ इति॥ ननु किमात्मा चरा
चरात्मकप्रपंचस्य निमित्तकारणं॥ उपादानकरणं वा॥ नाद्यः॥ दंडादिवत्तस्य कार्यव्यापि
त्वं न स्यात्॥ आत्मनस्तु तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुत्या स्वकार्ये व्यापित्वश्रवणा
त्॥ न द्वितीयः॥ अचेतनस्य जडस्य प्रपंचस्य चैतन्योपादानकत्वासंभवात्॥ उपादानकत्वे
न कार्यकारणयोरभेदेन प्रपंचस्यापि चैतन्यरूपत्वप्रसंगात् अनित्यत्वं न स्यादित्याशं

क्य जडप्रपंचं प्रत्यात्मनः चैतन्यप्राधान्येन निमित्तत्वं स्वाज्ञानप्राधान्येनोपादानत्वं

१६

च संभवतीत्याह॥ शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया॥ निमित्तं स्वोपाधिप्रधा
नतयोपादानं च भवति॥ यथायः कांतसंन्निधाने जडमयं लोहं चेष्टते तथा चैतन्य
संन्निधाने जडमयमज्ञानं चेष्टत इत्यज्ञानं विकारं प्राप्नोति चैतन्यस्य निमित्तत्वं जडाकाशा
दिकार्यं प्रति मायायाः साक्षादुपादानत्वेन मायाविन ईश्वरस्यापि परंपरयोपस्था[illegible]
रादुपादानत्वं न विरुध्यत इत्यर्थः॥ यदुक्तं चैतन्यस्य निमित्तकारणत्वे कार्यानुप्रवेशो

नस्यादिति॥ तन्न॥ कार्यस्य कार्यानुप्रवेशानियमस्योपादानकारण विषयत्वेन निमित्तकार
णविषयत्वाभावात्॥ तत्सृष्ट्वा। तदेवानुप्राविशदित्यादि[illegible]श्रुतेरप्युपादानकारणपरत्वो
त्॥ यद्यप्युक्तं॥ आत्मन उपादानकारणत्वे प्रपंचस्यानित्यत्वं नस्यादिति तदपि न॥ तस्य परि
णामविषयत्वेन विवर्त्तविषयत्वाभावात्॥ प्रपंचस्य च ब्रह्मविवर्त्तत्वात्॥ विवर्त्तत्वं च स्व
स्वरूपापरित्यागेन आकाशादिस्वरूपांतराकारेण प्रदर्शीकृतत्वं॥ तथाहि ईश्वरचैतन्यनिष्ठाज्ञा
नशक्तेरपि चैतन्यस्वरूपापरित्यागेन आकाशादि स्वरूपांतराकारेण प्रदर्शीकृतत्वं॥ एता
वताकाशादि प्रपंचस्यानित्यत्वं न संभवति॥ अज्ञानस्य मिथ्यारूपत्वे तज्जन्याकाशादि
प्रपंचस्यापि मिथ्यात्वात्॥ नचैवमज्ञानस्य मिथ्यात्वेन तत्प्रयुक्तबंधमोक्षयोरपि मिथ्या
त्वप्रसंग इति वाच्यं॥ इष्टापत्तेः॥ तदुक्तं भागवते॥ बद्धो मुक्त इति व्याख्या गुणतो मे न व
स्तुतः॥ गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनं॥ इत्यलमतिविस्तरेण॥ एकस्यैवात्मनः
… निमित्तोपादानकारणत्वे दृष्टांतमाह॥ यथा लूतातंतुस्य कार्यं प्रति स्वप्रधा

नतया निमित्तं स्वोपाधिप्रधानतया उपादानं च भवति ॥ यथा लूता तंतुः स्वोपाधि
प्रधानतं तु लक्षणकार्यं प्रति स्वचैतन्यप्रधानता निमित्तं चैतन्यसंन्निधानव्यतिरेकेण
जडस्य देहस्य मतशरीरवत्तंतुजनकत्वासंभवात् ॥ स्वशरीरप्राधान्येनोपादानं च भ
वति ॥ शरीरस्य साक्षात्तंतूपादानत्वेन तदवच्छिन्नचैतन्यस्याप्युपादानत्वोपचा

रात् ॥ एवमीश्वरस्यापि स्वचैतन्यप्रधानतया निमित्तत्वं स्वोपाधिप्रधानतयोपा
दानं च भवतीत्यर्थः ॥ इदानीं विक्षेपशक्तिमाह ॥ तमःप्रधानविक्षेपशक्तिमदज्ञा
नोपहितचैतन्यादाकाशः आकाशाद्वायुः ॥ वायोरग्निः अग्नेरापः ॥ अद्भ्यः पृथिवी
चोत्पद्यते ॥ आकाशादेर्जडत्वात्तमोगुणप्रधानविक्षेपशक्तियुक्ताज्ञानावच्छिन्न
चैतन्यस्यैवाकाशादिप्रपंचजनकत्वमिति भावः ॥ अस्मिन्नर्थे श्रुतिं प्रमाणयति ॥
तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यादिश्रुतेः ॥ एतेनार्थोत्सांख्येन्या

यत्पक्षौ निरस्तौ ॥ शक्तिरज्ञानस्य शक्तिमत्परतंत्रत्वात् ॥ स्वतंत्रस्य तस्य जडस्याज्ञान
स्य जगत्कारणत्वानुपपत्तेः ॥ ईक्षतेर्नाशब्दं ॥ रचनानुपपत्तेश्च नानुमानमित्यादिन्याय
निरस्तत्वाच्च ॥ परमाणोरप्युक्तदोषग्रासत्रासानपायात् ॥ अभिन्ननिमित्तोपादानप्र
तिपादकश्रुतिस्मृतिन्यायविरोधाच्च ॥ यतो वा इमानि भूतानि जायंते ॥ येन जातानि जी
वंति ॥ यत्प्रयंत्यभिसंविशंति ॥ सदेव सोम्येदमग्र आसीत् ॥ एतस्माज्जायते प्राणो
मनः सर्वेंद्रियाणि च ॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ॥ बीजं मां सर्वभूतानां इ
त्यादिभिरीश्वरस्यैव जगत्कारणत्व प्रतिपादनात् ॥ ननु आकाशादि प्रपंचोत्पादक
चैतन्यावच्छेदकाज्ञाने कुतस्तमःप्राधान्यमिति अशंक्याह ॥ तेषां आकाशादिषु जाड्या
धिक्यदर्शनात्तमः प्राधान्यं तत्कारणस्य ॥ कारणगुणा हि कार्ये गुणानारंभंत इति न्या
याद् इति भावः ॥ ननु त्रिगुणात्मकत्वादज्ञानस्य कथं तमोगुणमात्रप्राधान्येन आका

शादिजनकत्वमित्याशंक्याह॥ तदानीं सत्वरजस्तमांसि कारणगुणक्रमेण तेष्वाकाशा
दिषूत्पद्यंते॥ तदानीमुत्पत्तिवेलायां सत्वादयस्त्रयोपि गुणास्तारतम्येन कारणक्र प्र
मन्यायेन तेष्वाकाशादिषु पंचभूतेषु उत्तरोत्तराधिक्येन जायंत इत्यर्थः॥ इमान्ये
व सूक्ष्मशरीरादिकारणभूतापंचीकृतानि चोच्यंते॥ तदुक्तं॥ पंचप्राणमनोबुद्धि
दशेंद्रियसमन्वितं॥ अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनं॥ इति वचनादपि
 अपंचीकृतभूतेभ्यो [illegible] पंचीकृत सूक्ष्मशरीरेण पंचीकृतस्थूलभू
तेभ्यः स्थूलशरीराणि चोत्पद्यंत इत्याह॥ एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चो
त्पद्यंते॥ सूक्ष्मशरीरस्वरूपमाह॥ सूक्ष्मशरीराणि सप्तदशावयवात्मकानि
लिंगशरीराणि॥ सूक्ष्मशरीरस्य स्वरूपभूतान्यवयवानाह॥ अवयवास्तु॥
ज्ञानेंद्रियपंचकं। बुद्धिमनसी॥ कर्मेंद्रियपंचकं॥ वायुपंचकं चेति॥ ज्ञानेंद्रियाण्याह।

ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणरूपाणि॥ सात्विकांशादाकाशाच्छ्रोत्रमुत्पद्यते॥
सात्विकांशाद्वायोस्त्वगिंद्रियं॥ सात्विकांशात्तेजसश्चक्षुः सात्विकांशाज्जलाज्जिह्वा॥ सा
त्विकांशात्पृथ्व्याः सकाशात् घ्राणेंद्रियं चेति क्रमेणोत्पद्यते इत्याह॥ एतान्याका
शादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते बुद्धेर्लक्षणमाह॥
बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः॥ असावेवाहमिति निश्चयात्मिकांतः[illegible]णवृ
त्तिर्बुद्धिरित्यर्थः॥ मनसो लक्षणमाह॥ मनो नाम संकल्पविकल्पात्मिकांतःकरण[illegible]त्तिः॥ [illegible]याव
अहं चिद्रूपो वा देहो वेति संशयांतःकरणवृत्तिरेव मन इत्यर्थः॥ स्मरणा[illegible]त्मकला
त्स्यगर्वात्म कारंकारस्य च बुद्धिमनसोरंतर्भावइत्याह॥ अनयोरेव चित्ताहं[illegible]यो
रंतर्भावः॥ यद्यप्यंतःकरणत्वेन चतुर्णामेकत्वं तथाप्येकस्यैव पुरुषस्य नानाकः पाठ
कइत्यादिवृत्तिभेदादेवदेकस्याप्यंतःकरणस्य निश्चयसंशयस्मरणाहंकारविषय

47

भेदे बुध्यादिभेद इति भावः॥ बुध्यादीनामुत्पत्तिप्रकारं दर्शयति॥ एते पुनराकाशादि
गत सात्विकांशेभ्यो मिलितेभ्यः उत्पद्यन्ते॥ एतेषां खलु एवं सात्विकांशेभ्यो तेभ्य उत्प

मिलि

त्तौ निमित्तमाह॥ एतेषां प्रकाशात्मकत्वात् सात्विकांशकार्यत्वं॥ बुध्यादीनां प्रकाशात्म
कत्वात् सात्विकांशभूतकार्यत्वमित्यर्थः॥ बुद्धेर्विज्ञानमयकोशत्वं च दर्शयति॥ इयं
बुद्धिर्ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोशो भवति॥ बुद्धेः सात्विकांशकार्यत्वा
त्॥ ज्ञानेन्द्रियसाहित्येन प्रकाशाधिक्यात् विज्ञानमयत्वं॥ आत्माच्छादकत्वा

त्कोश इत्यर्थः॥ विशुद्धबुद्धप्रतिबिंबितविद्यात्मनः जीवत्वं दर्शयति॥ अयमात्मा

भोक्तृत्व

कर्तृत्वं दुःखित्वाद्यभिमानित्वेन इहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते॥
त प्रायः पिंडवत् बुध्याध्यारोपितं चैतन्यं वस्तुतो कर्तृ भोक्तृ नित्यानंदपरिच्छिन्न
मक्रियमपि कर्तृत्वभोक्तृत्वदुःखित्वपरिच्छिन्नत्वक्रियावत्वाद्यभिमानेन स्व

गं॥ दिलोकान्तरगामित्वं व्यावहारिकजीवत्वं चलत्वं मनस इत्यर्थः॥ मनोमयकोशं निरू
पयति॥ मनस्कर्मज्ञानेंद्रियैः सहितं सन्मनोमयकोशो भवति॥ सत्वगुणप्रधानं म
नः सत्वगुणांशेभ्यो जातश्रोत्रादिज्ञानेंद्रियैरेव सहितं सन्मनोमयकोश इत्युच्य
ते इत्यर्थः॥ अत्र मनसः सत्वोपहितरजोविकारेण रूपत्वात् संकल्पविकल्पात्मके
न बुध्यपेक्षया जाड्याधिक्यात् मनोमयत्वं॥ आत्माच्छादकत्वात्कोशत्वमिति भा
वः॥ कर्मेंद्रियाण्युद्दिश्यति॥ कर्मेंद्रियाणि॥ वाक्पाणिपादपायूपस्थाख्यानि॥ एते
षां उत्पत्तौ साधनापेक्षयाह॥ एतानि पुनराकाशादीनां रजोंशेभ्यो भूतेभ्यः प्र
थक्पृथक्क्रमेणोत्पद्यंते॥ भूतानां त्रिगुणात्मकत्वेपि रजोगुणप्रधानादाकाशाद्वागु
त्पद्यते॥ रजोगुणप्रधानाद्वायोः पाणींद्रियं॥ रजोगुणप्रधानादग्नेः पादेंद्रियं॥ र
जोगुणप्रधानाज्जलात्पायूइंद्रियं॥ रजोगुणप्रधानायाः पृथ्व्याः गुह्येंद्रियमुत्प

प्रधाना

घातइत्यर्थः॥ वायूननुदिशति॥ वायवः प्राणापानव्यानोदानःसमानाः यथोद्देशं
प्राणस्यलक्षणमाह॥ प्राणोनामप्राग्गमनवान्नासाग्रस्थानवर्त्ती॥ ऊर्ध्वगमन
शीलोनासाग्रस्थायीवायुः प्राणइत्यर्थः॥ अपानस्यलक्षणमाह॥ अपानोनामा
वाग्गमनवान्पाय्वादिस्थानवर्त्ती॥ अधोगमनशीलःपाय्वादिस्थायीवायुर
पानइत्यर्थः॥ व्यानस्यलक्षणमाह॥ व्यानोनामविष्वग्गमनवानखिलशरी
रवर्त्ती॥ सर्वनाडीगमनशीलोखिलशरीरस्थायीवायुर्व्यानइत्यर्थः उदानस्यल

क्षणमाह॥ उदानोनामकंठस्थानीयऊर्ध्वगमनवानुत्क्रमणवायुः ऊर्ध्वमुत्क्रम
णशीलःकंठस्थायीवायुः उदानइत्यर्थः॥ समानस्यलक्षणमाह॥ समानोनाम
शरीरमध्यगतअशितपीतान्नादिसमीकरणकरः॥ शरीरमध्यगतान्नरसादि
नेतावायुः समानइत्यर्थः॥ प्राणादीनांवायुत्वेनरूपेणैकत्वेपिक्रियाभेदेनभेर

पानाः

इतिभावः॥ कपिलमतानुसारिणः क्रियाभेदेनान्येपि पंचवायवः संतीति वदंती॥ तानेव
नामभिर्निर्दिशति॥ नागकूर्मकृकलदेवदत्तधनंजयाख्याः॥ नागउद्गीरणकरः कू
र्मउन्मीलनकरः। कृकलक्षुत्करः देवदत्तोजृंभणकरः धनंजयः शोषणकरः॥ तथो
क्तं॥ उद्गारनागआख्यातः कूर्मउन्मीलने स्मृतः॥ कृकलः क्षुतेज्ञेयोदेवदत्तो
विजृंभणः॥ नजहातिमृतंचापि सर्वव्यापी धनंजय इति॥ वेदांतिनस्तु॥ नागादीनांप्रा
णादिष्वंतर्भावं वदंतीत्याह॥ एतेषां नागादीनां प्राणादिष्वंतर्भावात् प्राणादयः
पंचैवेति केचित्॥ प्राणादिवायूनामुत्पत्तौ कारणापेक्षयामाह॥ एवं प्राणादिपंचकमाका
गत शादिरजोंशेभ्यो मीलितेभ्य उत्पद्यते॥ अपंचीकृतमहाभूतेभ्यो रजःप्रधानेभ्यः
प्राणादयो जायंत इत्यर्थः॥ एतेषां प्राणादीनां प्राणप्रचुरत्वात्प्राणमयत्वं॥ आत्माच्छा
दकत्वात्कोशत्वं च भवतीत्याह॥ इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं सत्प्राणमयः को
शो भवति॥ प्राणादीनां रजःप्रधानभूतकार्यत्वे निमित्तमाह॥ अस्य क्रियात्मकत्वेन

रजोंशकार्यत्वं॥ प्राणादीनां क्रियात्मकत्वात् रजःकार्यत्वमित्यर्थः॥ एतेषु पंचसु को-
शेषु मध्ये विज्ञानमयमनोमयप्राणमयकोशानां क्रमेण ज्ञानेच्छाक्रियाशक्तिभे-
देन कर्तृकरणक्रियारूपत्वं दर्शयन्ति॥ एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्ति-
मान् कर्तृरूपः मनोमय इच्छाशक्तिमान् करणरूपः प्राणमयः क्रियाशक्तिमान् कार्य-
रूपः॥ तत्र हेतुमाह॥ योग्यत्वादेवमेतेषां विभाग इति वर्णयंति॥ इदमेव कोशत्रयं

सूक्ष्मशरीरमितिव्यवह्रीयते [illegible]त्याह॥ एतत्कोशत्रयं मिलितं सत् सूक्ष्मशरीर-
मित्युच्यते॥ अस्य समष्टित्वे हेतुमाह॥ अत्रापि अखिलसूक्ष्मशरीरमेकबुद्धिवि-
षयतया वनवज्जलाशयवद्वा समष्टिः॥ एकबुद्धीति॥ चराचरप्राणिमात्रस्य यावं-
त्यनंतानि सूक्ष्मशरीराणि तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भा-
ख्येन स्वीयैकबुध्याविषयीकृतत्वात्समष्टित्वमित्यर्थः॥ तत्र दृष्टांतमाह॥ वन

वदित्यादि॥ अस्यैव सूक्ष्मशरीरस्य व्यष्टित्वं दर्शयति॥ अनेकबुद्धिविषयतया र
क्षवजलवद्वा व्यष्टिरपि च भवति॥ अनेकेषां जीवानां प्रत्येकं स्वस्वलिंगशरीरस्य
स्वस्वबुद्धिविषयत्वेनानेकबुद्धिविषयतया व्यष्टित्वमित्यर्थः॥ तत्र दृष्टांतमाह॥ ए
व्रक्षवदित्यादि॥ उक्तसमष्ट्यवछिन्नचैतन्यस्य सूत्रात्मत्वादिसंज्ञां दर्शयति॥
तत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते॥ तत्र हेतुमाह॥
सर्वत्रानुस्यूतत्वाज्ज्ञानेछाक्रियाशक्तिमदुपहितत्वाच्च॥ सर्वप्राणिलिंगशरीरे
ष्वनुस्यूतत्वात्॥ विद्यमानत्वादित्यर्थः॥ हेत्वंतरमाह॥ ज्ञानेति॥ ज्ञानेछाक्रिया
शक्तिमत्कोशत्रयोपाध्यवछिन्नत्वादित्यर्थः॥ विज्ञानमयादिकोशत्रयस्य स्थू
लशरीरतां दर्शयति॥ अस्यैषा समष्टिः स्थूलप्रपंचापेक्षया सूक्ष्मत्वात्सूक्ष्म
शरीरं विज्ञानमयादिकोशत्रयं॥ अस्य सूत्रात्मनो हिरण्यगर्भाख्यस्य वि

ज्ञानमयादिकोशत्रयं सूक्ष्मशरीरं॥ अस्य स्थूलप्रपंचापेक्षया सूक्ष्मत्वादित्यर्थः॥
अस्यैव विज्ञानमयादिकोशत्रयस्य स्वप्नत्वयुक्तिमाह॥ जाग्रद्वासनामयत्वात्स्व
प्नः॥ विराड्रूपेणानुभूतस्थूलप्रपंचविषयकवासनामयत्वात्स्वप्नत्वमस्येत्यर्थः॥
अतएव स्थूलप्रपंचलयस्थानमितिचोच्यते॥ यतः स्वप्नत्वं सूक्ष्मत्वं वासनामय
त्वंच अतएव स्थूलप्रपंचलयस्थानमित्युच्यते इत्यर्थः॥ विज्ञानमयादिसमष्ट्यु

पाध्यवच्छिन्नचैतन्यस्य हिरण्यगर्भत्वं प्रतिपाद्येदानीं व्यष्ट्युपलक्षितचै
तन्यस्य तैजसत्वं निरूपयति॥ एतद्व्यष्ट्युपहितंचैतन्यं तैजसो भवति॥ तत्र
हेतुमाह॥ तेजोमयांतःकरणोपहितत्वादस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्म
त्वादिहेतोश्च सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं॥ व्यष्टिरूपविज्ञानमयादिको
शत्रयं तैजसस्यापि सूक्ष्मशरीरमपि दर्शयति॥ अस्यापीति॥ सूक्ष्मशरीरं हि
त्वे।

२२

नुमाह॥ स्थूलेति॥ अस्यापि स्वप्नेहेतुमाह॥ जाग्रद्वासनामयत्वात्स्वप्नः॥ विश्वचैतन्ये
नानुभूतस्थूलशरीरविषयकवासनामयत्वात्स्वप्नत्वमित्यर्थः॥ अस्यैव सूक्ष्मशरी
रस्य स्थूलशरीरलयस्थानत्वे युक्तिमाह॥ जाग्रद्वासनामयत्वात्स्थूलशरीरलयस्था
नमिति चोच्यते॥ यथा पूर्वे प्राज्ञेश्वराव ज्ञानवृत्तिभिः सुषुप्त्यवस्थायामानंदमनु
भवतः॥ तथाहि॥ हिरण्यगर्भतैजसावपि स्वप्नावस्थायां मनोवृत्तिभिः वासनाम
यान् शब्दादिविषयाननुभवतः॥ अस्मिन्नर्थे श्रुतिमुदाहरति॥ प्रविविक्तभुक्तै
जस इत्यादिश्रुतेः॥ इहापि विज्ञानमयकोशत्रयस्य समष्टिरूपस्य तदवच्छिन्नसू
न त्रात्मनश्च व्यष्टिरूपविज्ञानमयादिकोशत्रयस्य तदवच्छिन्नतैजसचैतन्यस्य वनं
वृक्षादि तदवच्छिन्नाकाशादिदृष्टांतमुखेनाभेदं दर्शयति॥ अत्रापि समष्टिव्यष्ट्यो
स्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवज्जलाशयजलवत्

तप्रतिबिंबाकाशवदभेदः॥ समष्टिव्यष्ट्युपाध्योर्वनवृक्षवज्जलाशयजलवदभे
दः॥ उपाधिद्वयावच्छिन्नचैतन्ययोः सूत्रात्मतैजसयोरपि वनवृक्षावच्छिन्नाकाशवज्ज
लाशयजलगतप्रतिबिंबाकाशवदभेद इत्यर्थः॥ सूक्ष्मशरीरोत्पत्तिप्रकरणमुप
संहरति॥ एवं सूक्ष्मशरीरोत्पत्तिः॥ अथेदानीं स्थूलप्रपंचोत्पत्तिं निरूपयितुमुपसं
हरति॥ स्थूलभूतानि तु पंचीकृतानि॥ तुशब्दः पूर्वस्माद्वैषम्यं द्योतयति॥ पंचीकृ
तानीति॥ अपंचीकृतसूक्ष्मभूतापेक्षया स्थूलभूतानि पंचीकृतानीत्यर्थः॥ पंचीक

रणमेव प्रतिपादयितुं प्रतिजानीते॥ पंचीकरणं तु॥ पंचीकरणप्रकारमाह॥ आकाशा
दिषु पंचस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पंचभागान्प्रत्ये
कं चतुर्धा समं विभज्य तेषां च तुर्णां भागानां स्वस्वद्वितीयभागपरित्यागेन भागां
तरेषु संयोजनं॥ अयमर्थः॥ सृष्टिकाले सकलप्राण्यदृष्टवशादीश्वरप्रेरणया

काशानिलतेजोऽब्भूम्याख्यान्यविद्यासहायभूतात्परमात्मनः सकाशादनुक्रमजातानि
तान्यपंचीकृतानि सूक्ष्माणि व्यवहारासमर्थानीति कृत्वा तदीयस्थौल्यापेक्षायां व्य
वहर्तृप्राणिजातधर्माधर्मापेक्षयैव तान्येव भूतानि पंचीकृतानि भवंति॥ तानि च प्रत्ये
कं द्वैविध्यमापद्यते॥ तेष्वाकाशादिषु दशसु भागेषु आद्यभिकान् पंचभागान् प्रत्येकं
चतुर्धा समं विभज्य स्वार्द्धभागपरित्यागेन चतुर्णां प्रत्येकं भागांतरेषु संनिवेशेन
पंचीकृतानि स्थूलानि भवंतीति॥ अस्मिन्नर्थे वृद्धसम्मतिमाह॥ तदुक्तं॥ द्विधावि
धाय चैकैकं चतुर्धा प्रथमं पुनः॥ स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते इति॥ पंचीक
स्य रणस्य त्रिवृत्करणप्रतिपादकश्रुत्यंतरविरोधमाशंक्य परिहरति॥ आस्याप्रामाण्यं नाश
कनीयं त्रिवृत्करणश्रुतेः पंचीकरणस्याप्युपलक्षणत्वात्॥ भूतत्रयसृष्टिश्रुतेरुपरि
पृत्येथेमन्यश्रुतमपि भूतद्वयमाश्रित्य भूतपंचकाभिप्रायेण भूतत्रयसृष्टिप्रति
पादनादविरोध इत्यर्थः॥ आकाशादिपंचभूतेषु चतुर्द्धा विभक्तो नामप्येषां पंच

भूतानां प्रत्येकानुप्रवेशेन पंचीकृतानामाकाशादीनां पंचात्मकत्वात् विशेषादाकाशादीव्यपदेशो न स्यादित्याशंक्य परिहरति ॥ पंचानां पंचात्मकत्व समानेपि वैशेष्यात्तद्वादस्तद्वाद इति न्यायेनाकाशादिव्यपदेशः संभवति ॥ आकाशादीनां पंचात्मकत्वे समानेपि तेषु पंचभूतेषु तत्तद्विशेषानुप्रवेशात् तत्तन्नामभिः व्यवहारः संभवतीत्यर्थः ॥ तदानीमाकाशे शब्दोभिव्यज्यते ॥ यदा पंचीकृतान्याकाशादीनि तदानीं स्थूलत्वेन स्वस्वकार्योत्पादनसमर्थत्वादाकाशे अनभिव्यक्तिरूपेण स्थितः शब्दोभिव्यज्यते व्यक्तो भवतीत्यर्थः ॥ वायौ शब्दस्पर्शौ ॥ अग्नौ शब्दस्पर्शरूपाणि ॥ अप्सु शब्दस्पर्शरूपरसाः ॥ पृथिव्यां शब्दस्पर्शरूपरसगंधाश्च ॥ उक्तेभ्यः भूतेभ्यश्चतुर्दश भुवनोत्पत्तिः प्रकारं दर्शयति ॥ एतेभ्यः पंचीकृतेभ्यो भूतेभ्यो भूर्भुवः स्वर्महर्जनस्तपः सत्यमित्येतन्नामकादीनामुपर्युपरि विद्यमानानामतलपाताल वितल सुतल रसातल तलातल महातलानामनेकानामधोधो विद्यमानानां लोकानां ब्रह्मांडस्य चतुर्विधस्थू

लशरीराणां च तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति॥ एतेभ्यः पञ्चीकृतेभ्यः समुत्प
ब्रह्मांडस्य चतुर्विधस्थूलशरीराणां च तद्योग्यान्नपानादीनां चोत्पत्तिर्भवतीत्यर्थः॥ च
तुर्विधशरीराण्युद्दिश्याति॥ चतुर्विधशरीराणि तु॥ जरायुजाण्डजस्वेदजोद्भिज्ज्या
ख्यानि॥ तानि च यथोद्देशं विवृणोति॥ जरायुजानि जरायुभ्यो जातानि मनुष्य
पश्वादीन्यंडजान्यंडेभ्यो जातानि पक्षिपन्नगादीनि॥ स्वेदजानि स्वेदेभ्यो जातानि
यूकामशकादीनि॥ उद्भिज्जानि भूमावुद्भिद्य जातानि लतावृक्षादीनि॥ पूर्ववदत्रस
मष्टिव्यष्टिविभेदं दर्शयति॥ अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिवि
षयतया वनवत् [illegible]॥ जलाशयवद्वा समष्टिः वृक्षवज्जलवद्वा व्यष्टिरपि
च भवति॥ चतुर्विधशरीरजातमपि शरीरमित्येकबुद्धिविषयतया वनवत्सम
ष्टित्वं॥ प्रत्येकं तत्तच्छरीरविषयतया अनेकबुद्धिविषयत्वात् वृक्षवद्व्यष्टित्वं च॥

लफल इत्यर्थः॥ अधुना भूरादिचतुर्दशभुवनांतर्गतचतुर्विधस्थूलशरीरसमष्ट्यु
पहितचैतन्यस्य वैश्वानरत्वापरपर्यायविराजं दर्शयति॥ एतत्समष्ट्युपहितं चैतन्यं
वैश्वानरो विराडिति चोच्यते॥ तत्र युक्तिमाह॥ सर्वनराभिमानित्वाद्विविधं विराज
मानत्वाच्च॥ सर्वप्राणिशरीरेष्वहमित्यभिमानवत्त्वाद्वैश्वानरत्वं विविधं नानाप्रकारे
ण प्रकाशमानत्वाच्च वैराजत्वं लभ्यत इत्यर्थः॥ अस्यैषा समष्टिः स्थूलशरीरं॥
अस्य विराट्चैतन्यस्य एषा पूर्वोक्ता ब्रह्मांडांतर्गतचतुर्विधस्थूलशरीरसमष्टि
रेव स्थूलशरीरमित्यर्थः॥ अन्नविकारित्वादन्नमयः कोशः स्थूलभोगायतनत्वात्स्थू
लशरीरं जाग्रदिति व्यपदिश्यते॥ अन्नविकारबाहुल्यादन्नमयत्वं॥ आत्माच्छादक
त्वात्कोशत्वं॥ स्थूलशरीरादिविषयप्रयुक्तसुखदुःखभोगायतनत्वाच्च स्थूलशरी
रं॥ इंद्रियैरर्थोपलब्धेश्च जाग्रत्त्वस्थात्वं च घटत इत्यर्थः॥ चतुर्विधस्थूलशरी

२५　　२५

रस्तमष्ट्युपहितं चैतन्यं सप्रपंचमभिधायेदानीं तद्व्यष्ट्युपहितं चैतन्यमभिधत्ते॥ ए
तद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते॥ एतेषां चतुर्विधशरीराणां यथा व्यष्टिः त
त्तच्छरीरव्यक्तिस्तदुपहितं चैतन्यं विश्व इत्युच्यत इत्यर्थः॥ तत्र हेतुमाह॥ सूक्ष्मशरीरा
भिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात्॥ सूक्ष्मलिंगशरीराभिमानं परित्य
ज्य स्थूलशरीरेषु प्रविश्य तत्तत्स्थूलशरीरेषु सर्वेषु प्रत्येकमहमहमित्यभिमानित्वा
द्विश्वत्वमित्यर्थः॥ अस्याप्येषा व्यष्टिः स्थूलशरीरं॥ अस्य विश्वचैतन्यस्याप्येषा त
त्तच्छरीरव्यक्तिविशेषलक्षणाया व्यष्टिः सैव स्थूलमित्यर्थः॥ अत्राप्यन्नविकार
त्वादन्नमयत्वं॥ चैतन्याच्छादकत्वात्कोशत्वं इंद्रियैरर्थोपलब्धेर्जाग्रत्वं क्र
मेण दर्शयति॥ अन्नविकारत्वादेव हेतोरन्नमयः कोशः जाग्रदिति चोच्यते॥ अधु
ना जाग्रदवस्थायां विश्ववैश्वानरयोस्तत्तद्देवताधिष्ठितश्रोत्रादिभिश्चतुर्द

तो

वे.सा.   श्रोत्र त्वक् चक्षु जिह्वा घ्राण ॥ वाक् पाणि पाद पायु उपस्थ
दिक् वायु सूर्य वरुण अश्विनि अग्नि इंद्र उपेंद्र यम प्रजापति   टि.सु.

शाभिः करणैः शब्दादिविषयग्रहणप्रकारं दर्शयति ॥ तदानीमेतौ विश्ववैश्वानरौ
दिग्वातार्कवरुणाश्विभिः क्रमान्नियतत्वेन श्रोत्रादीन्द्रियपंचकेन क्रमाच्छब्दस्प
र्शरूपरसगंधानग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियंतत्वेन वागादीन्द्रियपं
चकेन क्रमाद्वचनादानगमनविसर्गानंदांश्चंद्रचतुर्मुखशंकराच्युतैः क्रमान्नियंत
त्वेन मनोबुध्यहंकारचित्ताख्येनांतरिंद्रियचतुष्केण क्रमात्संकल्पनिश्चयाहंकार
चैत्यांश्च सर्वानेतान्स्थूलविषयाननुभवतः ॥ अस्मिन्नर्थे श्रुतिं संवादयति ॥
जागरितस्थानो बहिःप्रज्ञ इत्यादिश्रुतेः ॥ अनयोर्विश्ववैश्वानरयोर्वनवृक्षाव
च्छिन्नाकाशदृष्टांतेन जलाशयजलगतप्रतिबिंबाकाशदृष्टांतेन च पूर्ववदभेदं
दर्शयति ॥ अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च
वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलगतप्रतिबिंबाकाशवच्च पूर्व

२५   २५

मन बुद्धि चित्त अहंकार अंतःकरणचतुष्टयस्य गुणाः क्रमात्
चंद्र ब्रह्मा विष्णु रुद्र संकल्प निश्चय चैत्य अहंकार

दभेदः॥ स्थूलशरीरप्रपंचोत्पत्तिमुपसंहरति॥ एवं पंचीकृतभूतेभ्यो स्थूलप्रपंचोत्प

त्तिः॥ स्थूलसूक्ष्मकारणप्रपंचानां व्यष्टिभूतानां प्रत्येकविवक्षयावांतरप्रपंचत्वमभि

धायेदानीं तेषां समष्टिरेव महाप्रपंचं दर्शयति॥ एतेषां स्थूलसूक्ष्मकारणप्रपंचानां

मपि समष्टिरेको महान्प्रपंचो भवति॥ तत्र दृष्टांतमाह। यथावांतरवनानां समष्टिरे

कं महद्वनं॥ यथावांतरजलाशयानां समष्टिरेको महान्जलाशयः॥ यथाधवखदिर

पलाशाद्यावांतरवनानां समष्टिः समुदायविवक्षया एकं महद्वनं भवति॥ यथावापी

कूपतडागादीनामवांतरजलाशयानां समुदायविवक्षया एको महान्जलाशयो भवति॥

तथा स्थूलसूक्ष्मकारणावांतरप्रपंचानां समुदाय एको महान्प्रपंचो भवतीत्यर्थः॥

वा एतदवांतरमहाप्रपंचोपहितानां विश्वतैजसप्राज्ञानां वैश्वानरहिरण्यगर्भाव्याकृ

तानां चावांतरवनावच्छिन्नाकाशवदवांतरजलाशयगतप्रतिबिंबाकाशवच्चाभे

दृढस्याह॥ एतदुपहितं चैश्वरादीश्वरपर्यंतं चैतन्यमप्यवांतरवनावच्छिन्नाकाशवद्वांत
रजलाशयगतप्रतिबिंबाकाशवच्चैकमेव॥ चैतन्यप्रपंचयोः भेदे सर्वं खल्विदं ब्रह्मेति
श्रुत्याविरोधं आक्षिप्यपरिहरति॥ आभ्यां महत्प्रपंचतदुपहितचैतन्याभ्यां तप्तायः
पिंडवदविविक्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भवति॥ विवि
क्तं सल्लक्ष्यमपि च भवति॥ उक्तमहत्प्रपंचतदवच्छिन्नचैतन्याभ्यां तप्तायःपिंडवदन्यो २७
अध्या
न्यतादात्म्यासंसपन्नं यद्वस्तु तदवच्छिन्नचैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं
भवति॥ अन्योन्यतादात्म्याध्यासानापन्नं सल्लक्ष्यं भवतीत्यर्थः॥ अध्यारोपप्रकरण
मुपसंहरति॥ एवं वस्तुन्यवस्त्वारोपः सामान्येन दर्शितः॥ ईश्वरचैतन्ये सामान्यतो
महाप्रपंचाध्यारोपप्रकारं सप्रपंचमभिधायेदानीं प्रत्यगात्मनि विशेषाध्यारोप
प्रकारं दर्शयितुमुपक्रमते॥ इदानीमित्यादिना॥ अध्यारोपमेवाह॥ इदानीमिति॥ इदा

नीरूपगात्मनि इदमिदमयमयमारोपयतीति विशेषत उच्यते ॥ आदूरतस्तु ॥ प्रत्यक्षादि
सन्निहितस्यापत्यादिधर्मिण इदमा निर्देशः क्रियते ॥ इदमित्यादेः वीप्सा तथा च ॥ अति
स्थूलबुद्धिस्तु इदमपत्यादिकमेवाहं ॥ अयं पुत्र एवाहमित्येतत् बाह्यधर्मोल्लविशेषेणात्मन्य
ध्यारोपयतीत्यर्थः ॥ अत्र श्रुतिः ॥ आत्मा वै पुत्रो जायत इत्यादिश्रुतेः ॥ तत्र युक्तिमाह ॥
स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टे वाहमेव पुष्टो नष्टश्चेत्यनुभवाच्च पुत्र आ
त्मेति वदति ॥ यथा स्वशरीरे प्रेमदर्शनादात्मभ्रमः एवं पुत्रादिशरीरेऽपि प्रेमदर्शनादात्मत्व
भ्रम इत्यर्थः ॥ अत्रानुभवमाचष्टे ॥ पुत्र इति ॥ एतदपेक्षया विशिष्टबुद्धिरन्यः कश्चिदधि
कारी स्वदेहमेवात्मानं मन्यत इत्याह ॥ चार्वाकस्तु अत्रापि श्रुतिमाह ॥ स वा एष पुरुषोऽन्न
रसमय इत्यादिश्रुतेः पुत्रादिशरीरस्यात्मत्वाभावे युक्तिं दर्शयन् पूर्वोक्त अधिकारिणः सका
शात्स्वस्य वैलक्षण्यं दर्शयति ॥ प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्

त्वा

देहस्यात्मत्वेऽनुभवंति प्रमाणयंति॥ स्थूलोहं कृशोहमित्याद्यनुभवाच्च स्थूलशरीरमात्मे
तिवदति॥ ततोप्युत्कृष्टः कोप्यधिकारी श्रुतियुक्त्यनुभवेभ्य इंद्रियाण्यात्मेतिवदती
त्याह॥ अपरश्चार्वाकः तेह प्राणाः प्रजापतिमेत्य ब्रूयुरित्यादिश्रुतेः इंद्रियाणामभावे शरीर
चलनाभावात् काणोहं बधिरोहमित्यनुभवाच्च इंद्रियाण्यात्मेतिवदति॥ ततोप्युत्तमाधिका
री कश्चिच्छ्रुतिप्रमाणानुभवबलात् प्राण एव आत्मेति आह॥ अपरश्चार्वाकोऽन्योंतर आ

त्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इंद्रियादिचलनाभावात् अहमशनावानहं पिपासा

वानित्याद्यनुभवाच्च प्राण एवात्मेति वदति॥ ततो विशिष्टाधिकारी कश्चित्स्वमतानुकूल
श्रुत्यादिबलान्मन एवात्मेत्याह॥ अन्यस्तु चार्वाकोऽन्योंतर आत्मा मनोमय इत्यादिश्रुतेः
मनसि सुप्ते प्राणादेरभावात् अहं संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मनः
आत्मेति वदति॥ उक्तेभ्यः पंचभ्यो विलक्षणः कश्चि[illegible]द्विज्ञानवादी श्रुत्यादिभिर्विज्ञा

नमात्मेति चाह॥ बौद्धस्त्वन्योन्तर आत्मा विज्ञानमय इत्यादिश्रुतेश्च॥ कर्तुरभावे करणस्य
शक्त्यभावात् अहं कर्ताहं भोक्तेत्यनुभवाच्च बुद्धिरात्मेति वदति॥ उक्तेभ्योऽतिरिक्तौ प्रा
भाकरतार्किकौ स्वमतोपयोगीश्रुत्यादिबलादज्ञानमात्मेति वदत इत्याह। प्राभाकर
तार्किकावन्योन्तर आत्मानन्दमय इत्यादिश्रुतेः बुध्यादीनामज्ञाने लयदर्शनात् अहम
ज्ञोऽहं ज्ञानीत्यनुभवाच्च अज्ञानमात्मेति वदतः। भाट्टस्तु॥ अज्ञानावच्छिन्नचैतन्यमा
त्मेत्याह॥ प्रज्ञानघन एव आनंद इत्यादिश्रुतेः सषुप्तौ प्रकाशाप्रकाशसद्भावात् माम
हं न जानामीत्यनुभवाच्च अज्ञानोपहितचैतन्यमात्मेति वदति॥ बौद्धैकदेशी कश्चि
दित्यादिभिः शून्यमात्मेत्याह। अपरो बौद्धः असदेवेदम ग्र आसीत् इत्यादिश्रुतेः
सुषुप्तौ सर्वाभावात् अहं सुषुप्तौ नासमित्युत्थितस्य स्वभावपरामर्शविषयानु

मनाद्यश्शून्यमात्मेति वदन्ति॥ अधुना पुत्रादिशून्यपर्यन्तानामात्मत्वप्रतिपादकश्रु
त्यादेराभासत्वात् पूर्वपूर्वमतस्योत्तरोत्तरमतबाध्यत्वाच्च दृश्यत्वजडत्वादिहेतु[illegible]श्चा　　भक
नात्मत्वं प्रसिद्धमेवेति प्रतिपादयितुं प्रतिजानीते॥ एतेषां पुत्रादीनामनात्मत्वमुच्य
ते॥ पुत्राद्यात्मत्ववादिनां मतिमन्दाधिकारित्वात्तत्प्रतिपादितश्रुत्यादेरपि पूर्वरू
पोत्तरोत्तरबाध्यत्वात्पुत्रादिशून्यान्तानामनात्मत्वं प्रसिद्धमेवेति प्रतिज्ञातमेवार्थं प्र
२९　कटयति॥ एतैरपि प्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वोक्तश्रु　२९ पूर्व
तियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधदर्शना
त्पुत्रादीनामनात्मत्वं स्पष्टमेव॥ ननु पुत्रादिशून्यपर्यन्तानामनात्मत्वे सिद्धे कस्त
र्हि प्रत्ययविषय आत्मेत्याशंक्याऽस्थूलादिनिषेधवाक्यजातबोधितं सत्संज्ञा

न मनं तं ब्रह्मेत्यादिविधिवाक्यकोटिबोधितं यत्सत्यं ज्ञानमनंतानंदाद्वयं ब्रह्म त
देवाहमात्मत्वेन मिति प्रबलश्रुतियुक्त्यनुभवैः प्रतिपादयितुमाह ॥ किं च प्रत्यगस्थू
ह्य लोऽचक्षुरप्राणोऽमना ह्यकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधादस्य
पुत्रादिशून्यपर्यंतस्य जडस्य चैतन्याभासत्वेन घटादिवदनित्यत्वात् ॥ [illegible]
[illegible] मस्थूलत्वादिप्रबलश्रुतिवाक्यैः पुत्रादिशून्यांतात्मातिरिक्तात्मस्व ना
रूपप्रतिपादनात् पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमित्यर्थः ॥ अस्मिन्नर्थे प्रब
लविद्वदनुभवप्रमाणयति ॥ तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रा
दिशून्यपर्यंतमखिलमनात्मैव ॥ अतस्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभा
वं प्रत्यक्चैतन्यमेवात्मवस्तु इति वेदांतविद्वदनुभवः ॥ यतः पुत्रादीनां जडत्वादि
हेतुभिरनात्मत्वं ॥ अतः पुत्रादिशून्यांतसर्वे नित्यशुद्धत्वादिस्वरूपमेवात्मवस्त्वित्य

सर्थः॥ नन्विदं विरुद्धं यत्पुत्रादीनामात्मत्वप्रतिपादकश्रुतीनामप्रामाण्यमस्थूलादि
श्रुतीनां प्रामाण्यमिति॥ नहि वेदवाक्येषु केषांचित्प्रामाण्यं केषांचिदप्रामाण्यं वा शक्यं
प्रतिपादयितुमेवं चेत्पुत्रादिश्रुतीनां प्रामाण्यमस्थूलादिवाक्यानामप्रामाण्य
मिति वैपरीत्यं किं न स्यात्॥ वेदवाक्यत्वाविशेषात्॥ किं केषांचिद्वेदवाक्यानां
मप्रामाण्यप्रतिपादनार्थमिदं प्रकरणमारब्धं॥ अतः कथं निर्णय इति चेत्॥
अत्रोच्यते॥ पुत्रादिश्रुतीनां सर्वथैव प्रामाण्यं नास्तीति न निषिध्यते॥ किं तु अ
स्थूलादिप्रबलश्रुतिस्मृतिन्यायविरोधात्॥ स्वार्थे तात्पर्याभावात्तेषां स्थूला
रुंधतीन्यायेन पूर्वपूर्वनिराकरणद्वारा सूक्ष्मसूक्ष्मवस्तूपदेशे तात्पर्यमित्ये
तच्चेदेव प्रतिपाद्यते॥ तथाहि॥ ध्रुवमरुंधतीं च दर्शयतीति विधिबलाद्

स्वच्छोररुधतीदर्शनप्राप्तेपरमसूक्ष्मायाअरुधत्याः प्रथमकृक्षायामेवप्रतिपत्तु
मशक्यत्वात्प्रथमंचंद्रज्योतिरूपारुंधतीत्युच्यते॥ ततश्चंद्रभिन्नातारकारूपारु
धतीत्युच्यते॥ तदनंतरमितरतारकाचतुष्टयाभिन्नातारकाचयात्मिकात्युच्यते॥
ततस्तत्समीपवर्तिनीपरमसूक्ष्मरूपारुंधतीत्युच्यते नचैतावताएतेषांपंचानां
वाक्यानांपरस्परविरुद्धार्थप्रतिपादकत्वेनाप्रामाण्यंप्रसक्तंप्रतिपादयितुं किंतुप्र
तिपत्तबुध्यनुसारेणसोपानक्रमवत्पूर्वंपूर्वंनिराकरणद्वारासूक्ष्मारुंधतीप्र
तिपादनेतात्पर्यात्॥ तद्वदिहापि अन्नमयः प्राणमयो मनोमयविज्ञानमय
आनंदमयआत्मा ब्रह्म पुच्छं प्रतिष्ठेति पुच्छब्रह्मपर्यवसितानां पंचकोशवाक्यानां
मपिपरस्परविरुद्धार्थप्रतिपादकत्वेपि प्रतिपत्तबुध्यनुसारेण सोपानक्रमव

त्पूर्वपूर्वनिराकरणद्वारा परमसूक्ष्मपुच्छब्रह्मप्रतिपादने तात्पर्यात् ॥ तस्मात्सर्वेषां वे
दांतवाक्यानां साक्षात्परंपरया वाद्वितीयवस्तुप्रतिपादने तात्पर्यात् ॥ प्रामाण्य
विरोध इति संक्षेपविशेषाध्यारोपप्रकरणमुपसंहरति ॥ एवमध्यारोपः ॥ आ
त्मवस्तुनि मिथ्याप्रपंचस्य सामान्यतो विशेषतश्चाध्यारोपप्रकारं सप्रपंचमभि
धायेदानीं तदपवादप्रकारं वक्तुमारभते ॥ अपवादो नामेति ॥ असंगोदासीनेप

रमात्मवस्तुनि तद्विवर्तो वस्तुकृताज्ञानादिमिथ्याप्रपंचस्य चिद्वस्तुमात्रावशेष
तयावस्थानमेवापवाद इति वक्तुं प्रथमं लौकिकदृष्टांतमाह ॥ रज्जुविव[र्त]स्य सर्प
स्य रज्जुमात्रवत् वस्तुविवर्तस्यावस्तुनो ज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं ॥ रज्जुस्व
रूपापरित्यागेन सर्पाकारेणभासमानस्य रज्जुविवर्तस्यापवादो नाशो ना

माधिष्ठानरज्जुमात्रतयाऽवस्थानवच्छुक्तिरूप्यस्याज्ञानादिप्रपंचस्य नाशो नाम चि
न्मात्रत्वेनावस्थानमित्यर्थः॥ अत्र यथास्वरूपेणावस्थितस्य वस्तुनोऽन्यथाभावो
द्विधा भवति॥ परिणामभावो विवर्त्तभावश्चेति॥ तत्र परिणामभावो नाम वस्तुनः
यथार्थतः स्वस्वरूपं परित्यज्य स्वरूपांतरापत्तिः॥ यथा दुग्धमेव स्वस्वरूपं प
रित्यज्य दध्याकारेण परिणमते। विवर्त्तभावस्तु वस्तुनः स्वस्वरूपापरित्यागेन
स्वरूपांतरेण मिथ्याप्रतिपत्तिः यथा रज्जुः स्वरूपापरित्यागेन सर्पाकारेण मिथ्याप्र
तिभासते॥ अत्र वेदांते ब्रह्मणि प्रपंचभावनस्य परिणामभावो नांगीक्रियते॥ दु
ग्धादिवद्ब्रह्मणो विकारित्वप्रसंगात् अनित्यत्वादिदोषापत्तेः॥ विवर्त्तभावांगी
कारे तु नायं दोषः ब्रह्मणि प्रपंचभावनस्य मिथ्यात्वेन विकारित्वाभावात् उक्तन
दुक्तं॥ अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः॥ तस्माच्छुक्तिवा[illegible]र्तस्यप्र

पंचस्य चिन्मात्रावशेषतया तस्थानमेवापवाद इति भावः॥ अस्मिन्नर्थे ग्रंथांतरसं
वाद दर्शयति॥ तदुक्तं॥ सतत्वतोन्यथा प्रथा विकार इत्युदीरितः॥ अतत्वतोन्यथा प्र
था विवर्त इत्युदीरितः॥ सामान्यतो दर्शितमपवादप्रक्रियां विस्तरेण प्रतिपादयितुं
प्रतिजानीते॥ तथाहि स्थूलसूक्ष्मकारणप्रपंचानामुत्पत्तिवैपरीत्येन तत्तत्कारण

रूपेणावस्थानमेवापवाद इत्याह॥ एतद्भोगायतनं चतुर्विधसकलस्थूलशरीर
जातं भोग्यरूपान्नपानादिकं एतदायतनभूतभूरादिचतुर्दशभुवनानि एतदा

यतनभूतब्रह्मांडं च एतत्सर्वमेतेषां कारणरूपपंचीकृतभूतमात्रं भवति॥ ए
तानि शब्दादिविषयसहितानि पंचीकृतानि भूतानि सूक्ष्मशरीरजातं च एतत्स
र्वमेतेषां कारणरूपाऽपंचीकृतभूतमात्रं भवति॥ एतानि सत्वादिगुणसहितानि
अपंचीकृतानि उत्पत्तिव्युत्क्रमेण एतत्कारणभूताऽज्ञानोपहितचैतन्यमात्रं

भवति॥एतदज्ञानमज्ञानोपहितंचैतन्यंचेदीश्वरादिक्रमेतदाधारभूतानुपहि
तंचैतन्यरूपंतुरीयंब्रह्ममात्रंभवति॥एतत्स्थूलशरीरंस्वाश्रयभेदोऽसहि
तंस्वकारणभूतपंचीकृतेषुपंचमहाभूतेषुलीनंसत्तन्मात्रतयावतिष्ठते॥ता
निपंचीकृतानिभूतानिशब्दादिसहकृतानिसप्तदशावयवात्मकलिंगशरीराणि
चस्वकारणेषुअपंचीकृतभूतेषुलीनानिभवंति॥तान्यपंचीकृता[illegible]निसत्वादि
गुणसहितानिस्वकारणाज्ञानोपहितचैतन्येलीनानिभवंति॥तज्ञाज्ञानंतदु
पहितंचैतन्यंसर्वज्ञत्वादिविशिष्टंचस्वाधारभूतानुपहितेचैतन्येलीनंभवति॥
चैतन्यमेवावशिष्यतइत्यर्थः॥फलितमाह॥आभ्यामध्यारोपापवादाभ्यांतत्वं
पदार्थशोधनमपिसिद्धंभवति॥तत्वंपदार्थशोधनप्रकारंप्रपंचयितुंप्रतिजानी
ते॥तथाहि॥अज्ञानादिसमष्टिरेतदुपहितंसर्वज्ञत्वादिविशिष्टचैतन्यमेतद

पं

उपहितं चैतन्यं तत्प्रायः पिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति॥
अज्ञानेन तदवच्छिन्नेश्वरचैतन्यं तदनुपहितं चैतन्यं तत्प्रायः पिण्डवदन्योन्यतादा
त्म्याध्यासेनैकत्वेन प्रतीयमानं तत्पदवाच्यार्थो भवतीत्यर्थः॥ तत्पदलक्ष्या
र्थमाह॥ एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं तत्पदल
क्ष्यार्थो भवति॥ अज्ञानावच्छिन्नेश्वरचैतन्य[illegible]स्याधारभूतं यदनुपहितं चै
तन्यं ताभ्यां विविक्तं सदुद्दिविवक्षया तत्पदलक्ष्यार्थो भवतीत्यर्थः॥ त्वंपदवाच्या
र्थमाह॥ अज्ञानादिव्यष्टिरेतदुपहिताल्पज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चै
तन्यं तत्प्रायः पिण्डवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति॥ व्यष्टिभूत
तमज्ञानं यदन्तःकरणं तदवच्छिन्नं जीवचैतन्यं तदनुपहितचैतन्यं चैतत्त्र
यं तत्प्रायः पिण्डवत्परस्परं तादात्म्याध्यासेनाभेदविवक्षया त्वंपदवाच्या

१२त

३२   ३३

ना।

थोऽभवतीत्यर्थः। त्वंपदलक्ष्यार्थमाह॥ एतदुपाध्युपहिताधारभूतमनुपहितं प्र
त्यगानंदं तुरीयचैतन्यं त्वंपदलक्ष्यार्थो भवति॥ अंतःकरणोपहितचैतन्यस्या
धारभूतं यदनुपहितं प्रत्यगानंदं तुरीयचैतन्यं त्वंपदलक्ष्यार्थो भवतीत्यर्थः॥ पदा
र्थमभिधाय वाक्यार्थमाह॥ अथ महावाक्यार्थो वर्ण्यते॥ ननु जीवेश्वरयोः किंचि
ज्ज्ञसर्वज्ञत्वादिविशिष्टयोरत्यंतविलक्षणयोस्तत्त्वमस्यादिमहावाक्यानि परस्प
रविरुद्धार्थप्रतिपादकानि कथमखंडैकरसं ब्रह्म प्रतिपादयंतीत्याशंक्य प्रतिपाद साक्षात्
कत्वाभावेऽपि लक्षणया संबंधत्रयेण वाक्यं अखंडार्थं प्रतिपादयंतीत्याह॥ इदं तत्त्वम
ति सिवाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति॥ संबंधत्रयस्वरूपमाह॥ संबंधत्र
यं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्म
पदार्थयोर्लक्ष्यलक्षणभावश्चेति॥ पदार्थे प्रत्यगात्मनोः संबंधत्रयसद्भावेऽप

द्रसमष्टिमाह॥ तदुक्तं॥ सामानाधिकरण्यं च विशेषणविशेष्यता॥ लक्ष्यलक्षण संबंधः पदार्थप्रत्यगात्मनां॥ ॥ पदमिति पदयोः सामानाधिकरण्यमुदाहरणनिष्ठं कृत्वा प्रदर्शयति॥ सामानाधिकरण्यसंबंधस्तावत्॥ यथा सोयं देवदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्कालविशिष्टदेवदत्त वाचकायंशब्दस्य च एकस्मिन्पिंडे तात्पर्यसंबंधः भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं॥ तत्र सोयं देवदत्त इति वाक्ये सदिति तत्पदस्य तत्कालतद्देशवैशिष्ट्यं प्रवृत्तिनिमित्तं एतत्कालैतद्देशविशिष्टमयंशब्दस्य प्रवृत्तिनिमित्तं तथा च भिन्नप्रवृत्तिनिमित्तयोः सोयंशब्दयोरेकस्मिन्देवदत्तपिंडे तात्पर्यसंबंधः समानाधिकरण्य[illegible]मित्यर्थः उक्तमर्थे दार्ष्टां

३८ ३८ स्य

त्तिकयोनयति॥ तथा तत्वमसीति वाक्येपि परोक्षत्वादिविशिष्टचैतन्यवाचकत
त्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिन्न्चैतन्ये तात्पर्येसं
बंधः॥ तथा तत्वमसीति वाक्येपि परोक्षत्वसर्वज्ञत्वादि वैशिष्ट्यं तत्पदप्रवृत्ति
निमित्तमपरोक्षत्वं किंचिज्ज्ञत्वादि वैशिष्ट्यं त्वंपदप्रवृत्तिनिमित्तं॥ तथा च भिन्नप्र
वृत्तिनिमित्तयोस्तत्त्वंपदयोरेकस्मिन्चैतन्ये तात्पर्ये संबंधः सामानाधिकरण्य

सं [illegible]मित्यर्थः॥ विशेषणविशेष्यभावसंबंधस्वरूपमाह॥ विशेषणविशेष्यभा
वसंबंधस्तु॥ यथा तत्रैव वाक्ये सशब्दार्थेन तत्कालविशिष्टदेवदत्तस्यायं शब्दा

चा र्थैतत्कालविशिष्टदेवदत्तस्यान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः॥
व्यावर्तकं विशेषणं॥ व्यावर्त्यं विशेष्यं॥ तथा सोयं देवदत्त इति वाक्ये एवायं शब्दा
च्चायोसावेतत्कालेन [illegible] देशसंबंधविशिष्टदेवदत्तपिंडः अयं सइति

सं

स्या

तच्छब्दवाच्यात्तत्कालतद्देशसंबंधविशिष्टाद्देवदत्तपिंडादभिन्नोनेति यदाप्रती
यते॥ तदा तच्छब्दार्थैकदेशं शब्दवाच्यार्थे निष्ठभेदव्यावर्त्तकतया विशेषणत्वं॥ अ
यंशब्दार्थस्यव्यावर्त्यत्वात् विशेष्यत्वं यदा च स इति तच्छब्दवाच्यस्तत्का
लतद्देशविशिष्टो देवदत्तपिंडः सोयमितीदंशब्दवाच्यादेतत्कालैतद्देशसं
बंधविशिष्टाद्देवदत्तपिंडादभिन्नो न वेति यदा प्रतीयते॥ तदायं
शब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वं॥ तच्छब्दार्थस्य व्या
वर्त्यत्वाद्विशेष्यत्वं॥ तथा च अयमेव सः स एवायमित्यन्योन्यभेदव्यावर्त्त
कतया सोयंशब्दार्थयोः परस्परविशेषणविशेष्यभाव इत्यर्थः॥ उक्तवि
शेषणविशेष्यभावं दार्ष्टांतिके योजयति॥ तथा तत्रापि वाक्ये तत्पदार्थ

त

३५ ३५

परोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चा
न्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः॥ इहापि तत्त्वमसीति वाक्ये
पि त्वंपदवाच्यं यदपरोक्षत्वकिंचिज्ज्ञत्वादिविशिष्टचैतन्यं तत्पदवाच्यात्सर्व
ज्ञत्वादिविशिष्टचैतन्यान्नभिद्यत इति यदा प्रतीयते तदा तत्त्वंपदार्थस्य त्वं
पदार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वं॥ यदा च तत्पदवाच्यं यत्सर्वज्ञ
त्वादिविशिष्टचैतन्यं तत्त्वंपदवाच्यात्किंचिज्ज्ञत्वादिविशिष्टचैतन्यान्नभिद्यत
इति यदा प्रतीयते तदा त्वंपदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्त्तकत्वेन विशे
षणत्वं॥ तत्पदार्थस्य विशेष्यत्वं॥ तथा च तत्त्वमसि॥ तत्त्वमसीति तत्त्वंपदा
र्थयोः परस्परभेदव्यावर्तकत्वेन विशेषणविशेष्यभाव इत्यर्थः॥ क्रमप्रा
प्तलक्ष्यलक्षणभावसंबंधस्वरूपं निरूपयितुमाह॥ लक्ष्यलक्षणसं

ति

बंधस्तु॥ यथात्र सशब्दायं[illegible]शब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैत
त्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः॥ अ
साधारणधर्मप्रतिपादकं वाक्यं लक्षणवाक्यं तत्प्रतिपाद्यमवशिष्टवस्तु लक्ष्यं॥
तथा च सोयं देवदत्त इ[illegible]स्मिन्नेव वाक्ये सोयंशब्दयोस्तदर्थयोर्वा विरुद्धं
तत्कालतद्देशविशिष्टत्वपरिहारेणाविरुद्धदेवदत्तत्वविशिष्टदेवदत्तपिंडेन
 सह देवदत्तत्वविशिष्टदेवदत्तवाचकशब्दस्य लक्ष्यलक्षणभावसंबंध इत्य ३६
र्थः॥ उक्तमर्थं दार्ष्टांतिके योजयति॥ तथात्रापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा वि
रुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टोपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यल
क्षणभावः॥ इहापि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वादिविशिष्टत्वा
परित्यागेन तत्त्वंपदार्थाभ्यां लक्ष्याविरुद्ध[illegible]चैतन्येन सह तत्त्वंपदयोर्लक्षल

क्षण भव संबंध इत्यर्थः॥ अत्रात्वंपदयोस्तदर्थयोश्च त्यक्तविरुद्धांशयोर्लक्षण
त्वमखंडचैतन्यस्य लक्ष्यत्वमिति भावः॥ ननु तत्वमस्यादिवाक्यानां लक्ष्यल
क्षण भावसंबंध पुरस्कारेण चैतन्यबोधकत्वमुक्तमन्य त्र तु शास्त्रे तेषां
वाक्यानां भागलक्षणयैव चैतन्यबोधकत्वं प्रतिपाद्यते॥ तत्वमस्यादिवाक्ये
षु लक्षणा भागलक्षणेत्यादि विरोधमाशंक्य सज्ञाभेदेन वस्तुभेद इत्याह॥ इ
यमेव भागलक्षणेत्युच्यते॥ तत्वमस्यादिवाक्यानां विरुद्धांशपरित्यागेना
विरुद्धचैतन्यमात्रबोधकत्वमेव भागलक्षणेत्युच्यत इत्यर्थः॥ ननु यथा नीलो
त्पलं इति वाक्ये नीलत्वविशिष्टनीलगुणस्योत्पलविशिष्टोत्पलद्रव्यस्य च स्व
व्यतिरिक्तशुक्लादिगुणांतरपटादिद्रव्यांतरव्यावर्तकत्वेन विशेषणविशे
ष्यभाव निरूपितेन तद्भिन्नसंसर्गेस्य नीलगुणवैशिष्ट्य वाक्यार्थत्वं तथे
॥

हाप्यि तत्वमस्यादिवाक्ये तत्पदार्थस्य परोक्षत्वादिविशिष्टेश्वरचैतन्यस्य त्वंप
दार्थस्यापरोक्षत्वादिविशिष्टजीवचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया विशे
षणविशेष्यभूतसर्वज्ञत्वकिंचिज्ज्ञत्वाभ्यां निरूपितसंसर्गो वा सर्वज्ञत्वादि
विशिष्टस्य किंचिज्ज्ञत्वादिविशिष्टेन सहैक्यं वा वाक्यार्थो भवत्वित्याशंक्य दृष्टां
तदार्ष्टांतिकयोर्वैषम्या[illegible]न्नेत्याह। अस्मिन्नित्यादिना। अस्मिन्वाक्ये नी
लमुत्पलमिति वाक्यवद्वाक्यार्थो न संगच्छते॥ अस्मिन्नु तत्त्वमसीति वा
क्ये नीलोत्पलमित्यादिवाक्यवत्संसर्गो वा विशिष्टो वा वाक्यार्थो न संगच्छ
ते इत्यर्थः॥ नीलोत्पलमिति वाक्य[illegible]स्य संसर्गे वा विशिष्टार्थे प्रतिपादकत्वकल्प
ने विरोधाभावं दर्शयति। तत्र नीलपदार्थो नीलगुणस्योत्पलपदार्थो उत्पल
द्रव्यस्य [illegible]न शौक्ल्यपटादिव्यावर्त्तकतया ऽन्योन्यविशेषणविशेष्यभावसं
संसर्गस्यान्यतर[illegible] विशिष्टस्यान्यतरस्य तदै[illegible]क्यस्य वा वाक्यार्थत्वांगीकारे प्रत्य
क्षादिप्रमाणांतरविरोधाभावात्तद्वाक्यार्थः संगच्छते॥ नीलोत्पलपदार्थयोः गुणगुणिनोः विशेषणविशेष्यभावसं

संसर्गस्य नीलगुणविशिष्टोत्पलयोरैक्यस्य वाक्यार्थत्वांगीका

रे ऽत्यप्रत्यक्षादिप्रमाणांतर विरोधाभावात्तत्र तत्संगच्छते तदर्थः॥ तत्त्वमसीति वा

क्ये तु तत्त्वंपदयोः किंचिज्ज्ञत्वादिविशिष्टजीवचैतन्यस्य सर्वज्ञत्वादिविशिष्टेश्व

रचैतन्यस्य वा तद्रूपया विशिष्टचैतन्यैक्यं वाक्यार्थत्वांगीकारे प्रत्यक्षादि प्रमा

णांतर विरोधात्पूर्वस्माद्वैषम्यं दर्शयति॥ अत्र तु तदर्थे परोक्षत्वादिविशिष्टचै

तन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतर

विशिष्टस्यान्यतरस्य तदैक्यस्य वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणैर्विरोधा

द्वाक्यार्थो न संगच्छते॥ तदुक्तं॥ संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः॥

अखंडैकरसत्वेन वाक्यार्थो विदुषां मतः॥ ननु तत्त्वमस्यादिवाक्यार्थमखं

डार्थं बोधयति॥ जहल्लक्षणया वा किमजहल्लक्षणया जहोस्विज्जहदजह

ल्लक्षणयेति त्रिधा विकल्प्य दूषणमाह॥ अत्र तु॥ अत्र तत्त्वमसीति वाक्ये

तत्त्वमर्थो परोक्षत्वादि विशिष्टचैतन्यस्य

जहल्लक्षणा न संगच्छत इत्यन्वयः ॥ तदेतद्दर्शयितुं जहल्लक्षणाया उदाहरणं ताव
दाह ॥ गंगायां घोषः प्रतिवसतीति जहल्लक्षणा न संगच्छते ॥ मानान्तरविरोधे
तु मुख्यार्थस्य परिग्रहे मुख्यार्थेन विनाकृते प्रवृत्तिर्लक्षणेष्यते इति वचनात् ॥
गंगायां घोषस्यावस्थानासंभवात् गंगायां घोष इति वाक्यस्य मुख्यार्थे विरो

धे सति मुख्यार्थं परित्यज्य लक्षणया तत्संबंधी तीरे घोषावस्थानप्रति
३८
पादनात् ॥ तत्र जहल्लक्षणांगीकारो युज्यत इत्यर्थः ॥ तत्र गंगाघोषयोराधारा
धेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वात् वाच्यार्थमशेषतः परि
त्यज्य तत्संबंधीतीरलक्षणया युक्तत्वात् जहल्लक्षणा संगच्छते ॥ आधाराधे
यभावलक्षणं सर्वात्मना परित्यज्य इत्यर्थः ॥ तत्त्वमसीति वाक्यं प्राक्प्रतिपादि
तं जहल्लक्षणासंभवमाविष्करोति ॥ अत्र तु परोक्षापरोक्षत्वचैतन्यैकत्वलक्ष

क्षणस्य वाक्यार्थस्य भागमात्रविरोधात् ॥ तुशब्दः पूर्वस्माद्वैषम्यं द्योतयती ॥ त
त्वमसीति वाक्ये परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य सर्वात्मना वि
रोधात् परोक्षा[illegible] परोक्षत्वप्रतिपादकलक्षणांशे विरोधाच्चैतन्यैकत्वे विरोधा
भावात् गंगाघोषादिवाक्यवत्सर्वात्मना मुख्यार्थे सर्वपरित्यागसंभवाज्जहल्ल
क्षणा न संभवतीत्यर्थः ॥ तत्र हेतुमाह ॥ भागांतरमपि परित्यज्यान्यलक्षणायाः पि
अयुक्तत्वाज्जहल्लक्षणा न संगच्छते ॥ विरुद्धयोः परोक्षत्वापरोक्षत्वयोरे
कत्वासंभवे तत्परित्यागेऽपि चैतन्यभागस्यैकत्वे विरोधाभावात्तत्त्यागेन
पं युज्यत इत्यर्थः ॥ ननु यथा गंगायां घोषः प्रतीतिर्न सतीति वाक्ये गंगापदं प्रवाहल
क्षणं स्वार्थं परित्यज्य संबंधी तीरपदार्थं लक्षयती तथा तत्त्वमसी वाक्ये त
त्पदं स्वार्थं परोक्षत्वविशिष्टं परित्यज्य जीवचैतन्यं लक्षयतु ॥ एवं त्वंपद

मपि स्वार्थैकदेशं किंचिज्ज्ञत्वादिविशिष्टं परित्यज्य ईश्वरं चैतन्यं वा लक्षयतु। तस्माज्ज
हल्लक्षणेन भवतीत्याशंक्य निराकरोति॥ न च गंगापदं स्वार्थपरित्यागेन यथा
तीरपदार्थं लक्षयति। तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन तत्पदार्थं त्वंपदा
र्थं वा लक्षयतु॥ अतः कुतो जहल्लक्षणा न संगच्छत इति वाच्यं निराकरणप्रति
कारमेवाह। तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपीत
त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्॥ श्रुतवाक्यार्थस्य मुख्यार्थविरोधे मुख्यार्थसं
बंधिन्यश्रुतपदार्थे लक्षणेति सर्वजनसिद्धं तथा च गंगायां घोष इत्यत्र श्रुतवा
क्यार्थस्य गंगाघोषयोराधाराधेयभावसंबंधस्य विरोधे सति श्रूयमाणगंगा
पदमश्रुततीरपदार्थं लक्षयतीति युक्तं॥ गंगापदार्थस्य तीरपदार्थप्रती

तिसापेक्षत्वात्॥ इह तु श्रूयमाणतत्वंपदयोः मुख्यत्वयैव तदर्थे सर्वज्ञत्व [illegible]मर्थाद्वि
विज्ञत्वादिविशिष्टप्रतीतौ सत्यामपि लक्षणया तत्पदेन त्वंपदार्थप्रतीत्यपेक्षाभा
वात्॥ त्वंपदेन तत्पदार्थप्रतीत्यपेक्षाभावाच्च मुख्यार्थासंभवति॥ लक्षणयाऽ
न्याय्यत्वात् जहल्लक्षणा न संभवतीत्यर्थः॥ द्वितीयपक्षं दूषयति॥ अत्र शोणो धा
वतीति वाक्यवदजहल्लक्षणापि न संभवति॥ अत्र तत्त्वमसीति वाक्ये जहल्लक्ष
णा न संभवतीति अन्वयः॥ कुत इत्यत आह॥ तत्र शोणे गुणगमनलक्षणस्य
वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधप
रिहारसंभवात् अजहल्लक्षणा संभवति॥ अत्र तु परोक्षत्वापरोक्षत्वादि
विशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्संबंधिनो

यस्य कस्यचित् अर्थस्य लक्षितत्वेपि तद्विरोधपरिहारासंभवात् अजहल्लक्ष
णापि न संभवत्येव॥ तत्र शोणो धावतीत्यादिवाक्ये शोणगुणस्य गमनासंभ
वेन वाक्यस्य मुख्यार्थविरोधे सति श्रूयमाणं शोणपदं स्वार्थपरित्यागेन स्वाश्र
यमश्वादिकं लक्षयतीत्युक्तं॥ अत्र तु तत्त्वमस्यादिवाक्ये तत्त्वंपदार्थस्य परोक्ष
त्वापरोक्षत्वापरित्यागेन तद्विशिष्टचैतन्यलक्षणायामस्य लक्षितत्वेपि तद्विरो

धपरिहाराभावात् अजहल्लक्षणा न संभवतीत्यर्थः॥ ननु तत्पदं स्वार्थविरु

परोक्ष
द्धत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशापरित्यागेन त्वंपदार्थं किंचिज्ज्ञत्वादि
विशिष्टं जीवचैतन्यं लक्षयतु॥ त्वंपदं स्वार्थविरुद्धापरोक्षत्वादिधर्मं परित्यज्या
विरुद्धचैतन्यांशापरित्यागेन तत्पदार्थं सर्वज्ञत्वादिविशिष्टमीश्वरचैतन्यं ल
क्षयतु किं भागलक्षणांगीकारेणेत्याशंक्य निराकरोति॥ न च तत्पदं त्वंपदं

वाक्यार्थविरुद्धांशपरित्यागेनांशान्तरसहितं तत्पदार्थं त्वंपदार्थं वा लक्षयतु।। अल
क्षणप्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यं।। एकेन पदेन स्वार्थो[illegible]शा
पदार्थान्तरोभयलक्षणाया असंभवात्।। एकेन तत्पदेन त्वंपदेन स्वार्थांशपरित्या
गेन पदार्थान्तरोभयलक्षणासंभवादित्यर्थः।। अजहल्लक्षणासंभवे हेत्वंतरमाह।।
पदार्थान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च।। तत्पदेन त्वंपदे
न वा तदर्थप्रतीतौ सत्यां लक्षणया पुनरन्यतरस्यान्यतरप्रतीत्यपेक्षाभावादित्य
र्थः।। अतः परिशेष्यात्तृतीयपक्ष एवांगीकर्तव्य इत्युपसंहरति।। तस्माद्यथा सो
यं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्ट[illegible]
[illegible]देवदत्तलक्षणस्य वाक्यार्थो शेषविरोधाद्विरुद्धं देवदत्तांशमात्रं लक्षय
ति।। तस्मादिति यस्मात्तत्त्वमस्यादिवाक्यं जहल्लक्षणाऽजहल्लक्षणयोरसंभ

स्या २ तत्कालैतत्कालविशिष्टांशपरित्यागाविरुद्धं २

पिं॰ ४१

वस्तस्माज्जहदजहल्लक्षणयाविरुद्धांशपरित्यज्याविरुद्धाखंडचैतन्यमात्रंलक्षय
तीतियोजना॥ तत्रदृष्टांतमाह॥ यथेतिसोयंदेवदत्तइतिवाक्येप्रागुक्तजहल्ल
क्षणाऽजहल्लक्षणयोरभावेनतदेथेस्यतत्कालतद्देशविशिष्टस्यैतत्कालैतद्देश
विशिष्टस्यदेवदत्तलक्षणावाक्यार्थस्यैकस्मिन्नंशेतत्कालैतत्कालवैशिष्टभागे
विरोधदर्शनात्तत्परित्यागेनाविरुद्धंदेवदत्तमात्रंलक्षयति॥ मानांतरविरोधइ
त्युक्तं॥ न्यायेनेत्यर्थः॥ उक्तमर्थंदार्ष्टांतिकेयोजयति॥ तथातत्त्वमसीतिवाक्यंतद
र्थोवापरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशंपरित्यज्याविरुद्धमखंडचैतन्यमात्रं
लक्षयतीति॥ तथातत्त्वमस्यादिवाक्यस्यापिपरोक्षत्वापरोक्षत्वादिविशिष्टचै
तन्यैकत्वलक्षणमुख्यार्थप्रतिपादकत्वासंभवाज्जहदजहल्लक्षणयाविरुद्धप
रोक्षत्वादिवैशिष्ट्यांशपरित्यागेनाविरुद्धाखंडचैतन्यमात्रंप्रतिपादकत्वं

४१

चैतन्यैकत्वलक्षणस्यवाक्यार्थस्यांशेविरोधान्नैवेत्यर्थः परोक्षत्वापरोक्षत्वादिविशिष्ट४

तस्येत्यर्थः अखंडचैतन्यप्रतिपादकस्य तत्वमसीति वाक्यार्थं सप्रपंचमभिधाये
दानीं यजुर्वेदीयानुभववाक्यार्थविवरणे तमाह ॥ अथाधुनाहं ब्रह्मास्मीत्यनुभव
वाक्यार्थो विवर्ण्यते ॥ गुरुमुखान्नवलब्ध तत्वमस्यादिवाक्यश्रवणाद्देहाद्यहंकारां
तजडपदार्थसकलदृश्यविलक्षणप्रत्यगात्मनः शुद्धेन परमात्मना सहैकत्वबोध
नानंतरं कश्चिदधिकारी लब्धावसरः सर्वोपाधिविनिर्मुक्तं सच्चिदानंदैकरस
मनुभवेन जिज्ञासुराचार्योपदिष्टमहं ब्रह्मास्मीति वाक्यार्थमनुस्मरन् स्वा
त्मानंदमनुभवतीत्यर्थः प्रकारमेवाह ॥ एवमित्यादिना ॥ एवमाचार्येणाध्यारोपा
पवादतस्तत्वंपदार्थौ शोधयित्वा वाक्येनाखंडार्थे बोधितेऽधिकारिणाहं नित्य
शुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयं ब्रह्मास्मीत्यखंडाकाराकारि
ता चित्तवृत्तिरुदेति ॥ एवं संक्षेपेण वक्ष्यमाणप्रकारेणाधिकारिणश्चित्तवृत्ति
पुरःसरं

रुदेनीति संबंधः॥ कदेत्याकांक्षायामाह॥ आचार्येणेति॥ आचार्येणाविषयसंगे
निष्कलंकचैतन्ये शशशृंगायमानाविद्याहंकारादिशरीरांतमिथ्यापदार्थेम
ध्यारोपतदपवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा तत्त्वमसीतिवाक्येन जह
दजहल्लक्षणया विरुद्धांशत्यागेनाखंडचैतन्ये ज्ञापिते सतीत्यर्थः॥ किंविष
यिणी चित्तवृत्तिरुदेतीत्यपेक्षायामाह॥ अहं नित्येति॥ शुद्धपदेनाविद्यादिदो

षराहित्यं। बुद्धं स्वप्रकाशस्वरूपत्वेन जडोपाधिकं व्यवच्छिद्यते। मुक्तपदेन स
र्वोपाधिराहित्यं। सत्यमित्यविनाशित्वस्वभावत्वं परमानंदपदेन वैषयिक
मनुष्यानंदादिचतुर्मुखब्रह्मानंदपर्यंतानां कर्मजन्यत्वेन सातिशयित्वेन क्षयि
ष्णुत्वेन च तुच्छत्वे तेभ्यो विलक्षणनिरतिशयानंदस्वरूपत्वं प्रतिपद्यते। आनंत
पदेन घटादिवत्परिच्छेदराहित्येन देशतः कालतो वस्तुतश्चापरिछिन्नत्वं बोध्य

४२

अ

तेऽद्वयमिति नानात्वनिषेधेनैकत्वं बोध्यत इत्यर्थः ॥ ननु यथा दीपप्रभादित्यमंड
लं न व्याप्नोति न च प्रयोजनमस्ति तथापि नित्यशुद्धस्वप्रकाशमात्मानं जगच्चित्तवृ
त्तिः कथं विषयीकुर्यादिति ॥ किं प्रयोजनं चेत्याशंक्याह ॥ सा तु चित्प्रतिबिंब
सहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकुर्वन्तद्गताज्ञानमेव बाधते ॥
सा चित्तवृत्तिर्न शुद्धब्रह्मविषयिणी ॥ किं त्वज्ञानविशिष्टप्रत्यगभिन्नपरब्रह्मविष
यिणी ॥ सा च चैतन्यप्रतिबिंबसंवलिता सती चैतन्यगमज्ञानं विनिवर्तयति ॥ तस्याः ते
चैतन्यावरकाज्ञाननिवृत्तिरेव प्रयोजनमित्यर्थः ॥ नन्वधिकारिणस्तत्त्वमस्या
दिवाक्यश्रवणोत्पन्नाखंडचैतन्यवृत्त्या तदाश्रिताज्ञाननिवर्तनेऽपि तत्कार्यस्य सक
लचराचरप्रपंचजालस्य प्रत्यक्षतया भासमानत्वात्कथमद्वैतसिद्धिरित्याशंक्य
कारणाज्ञाननाशे तत्कार्यसकलप्रपंचनाशाद्द्वैतसिद्धिरित्येतत्सदृष्टांतमाह ॥

त५

यथापटकारणतंतुदाहे पटदाहवदखिलकारणाज्ञाने बाधिते सति तत्कार्ये
स्याखिलस्य बाधितत्वात् तदंतर्भूता अखंडाकाराकारिता चित्तवृत्तिरपि बा
धिता भवति॥ नन्वज्ञाननाशेन तत्कार्यस्य प्रपंचस्य नाशोऽस्तु तथाप्यखंडाकार
वृत्तेरद्वैतहानिरित्याशंक्याह॥ तदंतर्भूतेति॥ अखंडाकारवृत्तेरप्यज्ञानकार्यां
तर्भूतत्वात्तन्निवृत्त्या तन्निवृत्ते र्नाद्वैतहानिरित्यर्थः॥ ननु तथाप्यखंडाकारवृ
त्तिप्रतिबिंबितचैतन्याभासत्वात्कथमद्वैतसिद्धिरित्याशंक्याह॥ तत्र प्रतिबिं
बितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासनाऽसमर्था सती तयाभिभू
ता भवति॥ तथा स्वयंप्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया ते
नाभिभूतं सत्स्वोपाधिभूताखंडवृत्तेर्बाधितत्वात्॥ दर्पणाभावे मुखप्रतिबिं
बस्य मुखमात्रत्ववत्॥ प्रत्यगभिन्नपरब्रह्ममात्रं भवति॥ वृत्तिनिवृत्तौ तस्य

तिबिंबितचैतन्यस्य बिंबावभासनासमर्थत्वात् इत्युपाधिबाधेन प्रतिबिंबितं
चैतन्यं बिंबचैतन्यमात्रतयावशिष्यते॥ दर्पणोपाधिविगमे प्रतिबिंबितमुखा
भासस्य बिंबभूतमुखमात्रतावशेषवदित्यर्थः॥ अयंभावः शोधितत्वंपदार्थ
स्याधिकारिणस्तदभिविजृंभितगुरुशास्त्राभ्यां तत्त्वमसीत्युपदेशेनाहंनि
नेता। त्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदाद्वयाखंडब्रह्मास्मीतिचित्तवृत्तिरुदय
मासादयति तदानीमवतस्याभिव्यक्ताखंडचैतन्यबलेन तत्परिपीडिताज्ञा
ननाशोभवति॥ तदानीं कार्यस्य सर्वस्य वञ्चनादपि व्यक्तिरपि स्वयमेव कतक
करजोवत् दारुमथनजनिताग्निवद् दुग्धस्थदुग्धजलवशांसर्वथापि पतत्स्य जलवद्ध
नष्टाभवति॥ तदानीं तद्रूपाभासोपि स्वोपाधिभूतवृत्तिनाशात्स्वप्रकाशआ
त्मावभाससमर्थतया दर्पणविगमे तदुपाधिकस्य स्वाधिष्ठानमुखमात्रत्व

वदधिष्ठानमात्रो भवतीति वेदांतसिद्धांतरहस्यमिति॥ अत्र तस्यानुभवः श्लोका
श्च भांति परमप्यमोहजन्याः स्वप्नेंद्रजालमरुनीरसमा विचित्राः॥ यस्मिन्नखंडे
इह न स्फुरंले विशुद्धसत्कसुखाब्धिपरमामृतचित्तवृत्तौ॥ मत्तः परं न खलु वि ।१।।
श्वमिदं विभाति मध्ये च पूर्वमपरं नरशृंगतुल्यं॥ मायोत्थशास्त्रगुरुवाक्यस
४५ मुत्थबोधभानुप्रभाविलसितं क्व गतं न जाने॥२॥ निरतिशयसुखाब्धौ स्वप्र ४४
काशे परेऽस्मिन् क्वथमिदमविवेकादुत्थितं सत्कणीव॥ग॥ क्व नु गतमधुना तद्दैशि
कोवा श्रुतिर्वा परमविमलबोधे स्फुल्लितोऽहं न जाने॥३॥ तदेतत्सर्वमानेसि
निधायापसंहरति॥ प्रत्यगस्मिन्नेति॥ ननु मनसैवानुद्रष्टव्यं मनसैवेदमाप्त व
व्यं॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥ बुद्ध्यालोकनसाध्योऽस्मिन्वस्तु
न्यस्तमि.. तायदि॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भ

वेत्यादिश्रुतिस्मृतीनां ।। यतोवाचोनिवर्तंते अप्राप्य मनसासह ।। यन्मनसा न मनु
ते ।। अन्यदेव तद्विदिताद्यो अविदितादधि अविज्ञातं विजानतां विज्ञातमविजानतां
अनादिनोऽप्रमेयस्य ।। यद्विज्ञानं त्वया विप्र .. न्न विज्ञातमात्मना ताभ्यामन्यत
रं विद्धि यद्दृष्टं तज्जडमित्यादि श्रुतिस्मृतीनां च परस्परविरोधमाशंक्य परिह
रति ।। एवं वसति मनसैवानुद्रष्टव्यं ।। यन्मनसा न मनुत इत्यनयोरविरोधः ।।
एवमुक्तप्रकारेणाज्ञानचैतन्यस्य वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वे प्रतिषे
धे सतीत्यर्थः ।। तदेवाह ।। वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वप्रतिषेधप्रति
पादनात् ।। अंतःकरणवृत्तिरावरणनिवृत्त्यर्थमज्ञानावच्छिन्नचैतन्यं व्या
प्नोतीत्येतद्वृत्तिव्याप्यत्वमंगीक्रियते आवरणभंगानंतरं स्वयंप्रकाशमानं चै
तन्यं फलचैतन्यमित्युच्यते ।। तस्मिन्फलचैतन्ये निष्कलंके चित्तवृत्तिर्न व्याप्नोति ।।

आवरणभंगस्य प्रागेवज्ञातत्वेन प्रयोजनाभावादित्यर्थः अस्मिन्नर्थे ग्रंथां
तरं संवादयति॥ तदुक्तं॥ फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं॥ ब्र
ह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति॥ वृत्तिप्रतिबिंबितचैतन्या
भासस्यापि फलचैतन्यप्रकाशत्वेनेष्टत्रापि संमतिमाह॥ स्वयंप्रकाश
मानत्वान्नाभासउपयुज्यतइति जडपदार्थाकाराकारितचित्तवृत्तिविशे
षोक्तिः॥ इदानीं जडपदार्थविषयकचित्तवृत्तेः साकारवृत्त्यपेक्षया वैलक्ष
ण्यं दर्शयितुमाह॥ जडपदार्थेति॥ अहं ब्रह्मास्मि इत्यज्ञानाच्छिन्नब्रह्माका
रवृत्तिस्तद्गताज्ञानमात्रं निवर्तयति ब्रह्मतु स्वप्रकाशकतया स्वयमेव प्रका
शते॥ नतु वृत्तिप्रतिबिंबितचिदाभासेन चैतन्यं प्रकाश्यते तत्र तस्यासाम
र्थ्यादयं घट इति घटाकाराकारितचित्तवृत्तिस्तु घटावच्छिन्नचैतन्यावरका

ज्ञानं निवर्त्यमाना स्वप्रतिबिंबितचिदाभासेन जडं घटमपि प्रकाशयति॥ अनयोस्त
तो विशेषोस्तीत्यर्थः॥ एतदेव प्रपञ्चयितुं प्रतिजानीते॥ तथा हि अयं घट इति घटा
काराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्वग
तचिदाभासेन जडं घटमपि भासयति॥ जडपदार्थविषयिणीं चित्तवृत्तिमभिनी
य दर्शयति॥ अयमिति॥ वृत्तिसंबंधात्प्राक् घटस्याज्ञातत्वादज्ञातं घटं विषयी
कृत्य प्रवृत्ता चित्तवृत्तिर्घटगताज्ञानं दूरीकुर्वाणा घटमपि भासयतीत्यर्थः॥ अ
स्मिन्नर्थे वृद्धसम्मतिमाह॥ तदुक्तं॥ बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं॥ न
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्॥ बुद्धिश्च तत्र बुद्धौ प्रतिबिंबित चिदा
भासश्च बुद्धितत्स्थचिदाभासौ द्वावेतौ बुद्धिचिदाभासौ घटं व्याप्नुतः॥ तत्र तयो
र्मध्ये धिया वृत्त्या घटाज्ञानं नश्येत्॥ चिदाभासेन तु स्फुरेदित्यर्थः॥ अत्रानुरूपं

दृष्टांतमाह॥ यथा दीपप्रभामंडलमंधकारगतं घटपटादिकं विषयीकृत्य तद्ग
तांधकारं निरसनपुरःसरं स्वप्रभया तदपि भासयतीति॥ यथांधकारावस्थि
तं घटादिकं विषयीकृत्य प्रवर्तमानं दीपप्रभामंडलं घटावरकांधकारनिवृत्तिद्वारा
स्वप्रभया घटादिकं प्रकाशयति तद्वदित्यर्थः॥ इयता ग्रंथजालेन प्रतिपादि
तस्य प्रत्यगभिन्नपरमानंदाखंडचैतन्यसाक्षात्कारलक्षणामखंडाकारांतः
करणवृत्तिं प्रतिपादयिषुस्तत्साधनभूतश्रवणादेरवश्यानुष्ठेयत्वं तेषां लक्षणा
नि च क्रमेण दर्शयति॥ एवंभूतेत्यादिनाऽद्वैतं वस्त्वनुभासत इत्यंतेन॥ एवंभूतस्व
स्वरूपचैतन्यसाक्षात्कारपर्यंतं श्रवणमनननिदिध्यासनसमाध्यनुष्ठानस्या
पेक्षितत्वात्तेपि प्रदर्श्यंते॥ एवंभूतस्य श्रुतियुक्त्यनुभवैर्निरस्तसमस्तोपाधिकप्र
त्यगभिन्नपरमानंदचिद्रूपस्य साक्षात्कारपर्यंतं श्रवणादीन्यनुष्ठेयानीति

यो

४५

तं॥

प्रतिजानीते॥ तेपीति॥ श्रवणादयोपीत्यर्थः॥ तत्रश्रवणस्यलक्षणमाह॥ श्र
वणंनामषड्विधलिंगैरशेषवेदांतानामद्वितीयेवस्तुनितात्पर्यावधारणं॥ ली
नमर्थंगमयतीतिलिंगशब्दस्यव्युत्पत्तेंब्रह्माणिवृत्तिनिश्चयकैरुपक्रमोपसं
हारादिषड्विधैर्लिंगैः सर्वेषांवेदांतवाक्यानांमद्वितेब्रह्मणितात्पर्यनिश्चयः
श्रवणमित्यर्थः॥ तानिचलिंगानिक्रमेणादिशति॥ लिंगानितु॥ उपक्रमोपसं
हारावभ्यासोपूर्वताफलं॥ अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णयइतितानिद
र्शयति॥ यथेति॥ प्रकरणप्रतिपाद्यस्यार्थस्यतदाद्यंतयोरुपपादनमुपक्रमो
पसंहारौ॥ यथाछांदोग्यषष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः
एकमेवाद्वितीयमित्यादावेतदात्म्यमिदंसर्वमित्यंतेचप्रतिपादनं॥ तदुदाहृत्यदर्शय
ति॥ यथेति॥ [illegible] एकमेवाद्वितीयमित्युपक्रमःऐतदा

103

त्यमिदं सर्वमिति प्रतिपादनमुपक्रमोपसंहारावित्यर्थः॥ अभ्यासलक्षणमाह॥
प्रकरणप्रतिपाद्यस्यार्थस्य तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः॥ यथा तत्र
ैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनं॥ अत्रापि श्रुतिमु
दाहरति॥ यथेति॥ अपूर्वत्वस्य लक्षणमाह॥ प्रकरणप्रतिपाद्यस्याद्वितीयव
स्तुनः प्रमाणान्तराविषयीकरणमपूर्वत्वं॥ यथा तत्रैवाद्वितीयवस्तुनः प्रमाणां
तराविषयीकरणं॥ तं त्वौपनिषदं पुरुषं पृच्छामीत्यादिश्रुतिभिरुपनिषन्मात्र
वेद्यत्वप्रतिपादनात्॥ ब्रह्मणोऽपूर्वत्वमित्यर्थः॥ अथवा ब्रह्मस्वप्रकाशेन स्वव्य
वहारेऽतिरिक्तप्रमाणानपेक्षत्वाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः॥ क्रमप्राप्तस्य फ
लस्य लक्षणमाह॥ फलं तु प्रकरणप्रतिपाद्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र
तत्र श्रूयमाणं प्रयोजनं॥ यथा तत्राचार्यवान् पुरुषो वेद तस्य तावदेव चि

७

अ ७ ते

रं यावन्नाविमोक्ष्ये अथ संपत्स्ये तस्माद्द्वितीयवस्तुज्ञानस्य नश्याप्तिः प्रयोजनं श्रूय
ते॥ तत्रानुरूपमुदाहरणमाह॥ आचार्यवानित्यादि श्रवणादिसाध्य नानां ब्रह्म
त्मैकत्वविज्ञानं प्रयोजनं॥ ब्रह्मज्ञानस्य तु तत्प्राप्तिः फलं ब्रह्मवेद ब्रह्मैव भवति॥
तरति शोकमात्मविदित्यादि श्रुतेरित्यर्थः॥ पंचमलिंगस्यार्थवादस्य लक्षणमा
ह॥ प्रकरणप्रतिपाद्यस्य तत्र प्रशंसनमर्थवादः॥ यथा तत्रोत तमादेशमप्राक्ष्य

म एनोश्रुतं श्रुतं भवत्यमतं मतं विज्ञानं विज्ञातमित्यद्वितीयवस्तुप्रशंसनं॥ प्रक
रणप्रतिपाद्याद्वितीय ब्रह्मस्वरूपस्यावक [illegible] वाक्यमर्थवादमित्यर्थः॥ उत तमा
देशमित्यादि॥ एनाश्रुतं श्रुतं भवतीति॥ एन सकल प्रपंचाधिष्ठान ब्रह्मस्वरूप
श्रवणेनाश्रुतं प्रपंचजातमपि श्रुतं भवति॥ येन ब्रह्मज्ञानेनाज्ञातं सर्वजगज्ज्ञा
तं भवति॥ येन ब्रह्मसाक्षात्कारेणासाक्षात्कृतं साक्षात्कृतं भवति॥ ब्रह्मणः सर्व

वे.सा.

त्वा

हि.सु.

तः संपुतोदकस्थानीयौ इत्यर्थः ॥ अवशिष्टा[illegible]या उपपत्तेर्लक्षणमाह ॥ प्रकरण
प्रतिपाद्यार्थसाधने तत्र श्रूयमाणा युक्तिरुपपत्तिः ॥ यथा तत्र सोम्यैकेन मृत्पिं
डेन सर्वं मृण्मयं विज्ञातं ॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्या
द्वितीयवस्तुसाधने विकारस्य वाचारंभणमात्रत्वे युक्तिः श्रूयते ॥ तामुदाहर
ति यथेति ॥ मृद्विकारेषु घटादिषु विकारनामधेययोर्वाचारंभणमात्रत्वेन यथा

४८ तथा

मृत्वमेवावशिष्यते नान्यत्तु ॥ विद्धि विवर्तस्य प्रपंचस्य गिरिनदीसमुद्रात्मकविका
रनामधेययोर्वाचारंभणमात्रत्वात् चिन्मात्रमेवावशिष्यते ॥ रज्जुविवर्तसर्पस्य स्व

४

रज्जुमात्रावशेषवदित्यर्थः ॥ श्रवणनिरूपणानंतरं तदुत्तरांगस्य मननस्य लक्ष
णमाह ॥ मननं तु श्रुतस्याद्वितीयवस्तुनो वेदांतानुगुणयुक्तिभिर्नैरंतर्येणा
नुचिंतनं मननमित्यर्थः ॥ निदिध्यासलक्षणमाह ॥ विजातीयदेहादिप्रत्य

यद्रहितादद्वितीयवस्तुसजातीयप्रत्ययप्रवाहोनिदिध्यासनं॥ विजातीयदे
हादिबुध्यंतजडपदार्थनिराकरणेनसजातीयाद्वितीयवस्तुविषयप्रत्ययप्र
वाहीकरणंनिदिध्यासनमित्यर्थः॥ व्युत्थानविरोधसंस्कारयोरभिभवप्रादु
र्भावेसतिचित्तस्यैकाग्रतापरिणामः समाधिः सचद्विविधइत्याह। समाधि
र्द्विविधः सविकल्पकोनिर्विकल्पकश्चेति॥ तस्यलक्षणमाह। तत्रसविकल्पको
नामज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनितदाकाराकारितायाः
चित्तवृत्तेरवस्थानं॥ तयोःसविकल्पकनिर्विकल्पकयोर्मध्येसविकल्पको
ऽपिद्विविधः॥ अहंब्रह्मास्मीतिशब्दानुविद्धतयाद्वितीयेवस्तुनिचित्तवृत्तेर
वस्थानमित्येकः॥ द्वितीयस्तुज्ञातृज्ञानज्ञेयत्रिपुटीलयानपेक्षयाहंब्रह्मास्मी
तिशब्दानुविद्धतयाद्वितीयवस्तुन्यवछेदेनचित्तवृत्तेरवस्थानमित्यर्थः॥

ननु भासितेपि श्रुतेन शांतो ह्युपासीतेति न्यायेनोक्तसविकल्पकसमाध्योः
सकलभेदनिराकरणाय प्रवर्तमानानयोरपि ज्ञात्रादिभेदविषयत्वेन नाद्वै
तवस्तुमात्रभानं तत्रेत्याशंक्योत्तरमाह॥ यथा मृन्मयगजादिभानेपि मृद्भा
नवदद्वैतभानेप्यद्वैतवस्तु भासते॥ तथा सविकल्पकसमाधावनुभवकाले ज्ञा
त्रादिभेदप्रतीतावप्यद्वैतवस्तु भासते॥२६॥ सुवर्णमयकुंडलादिभाने सुवर्ण
भानवन्मृण्मयगजादिभाने मृण्मयभानवच्च॥ गजादिभानस्य गजाकारेण
मात्रवज्ज्ञात्रादिभानस्यापि ज्ञात्राकारेण मात्रत्वाददद्वैतमेव वस्तु भासत
इत्यर्थः॥ यद्वा सर्वं खल्विदं ब्रह्म ऐतदात्म्यमिदं सर्वमित्यादिश्रुतिब
लात्सर्वमहमिति गिरिनदीसमुद्रात्मकं जगत्स्वाभिन्नसच्चिदानंदब्र

सत्तेनानुभूयमानत्वाद्दग्धपटन्यायेन प्रपंचभासेप्यद्वैतं सच्चित्तनंदलक्ष
णं वस्तुभासनमेवेत्यर्थः ॥ तदुक्तं भगवता ॥ वासुदेवः सर्वमिति स महात्मा सु
भ दुर्लभ इति ॥ मूलकारो प्यस्मिन्नर्थे ग्रंथांतरसंवादं दर्शयति ॥ तदुक्तं ॥ दृशिस्वरू
पं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं ॥ अलेपकं सर्वगतं यदद्वयं त
देव चाहं सततं विमुक्तमिति ॥ यत्परं ब्रह्म तदेवाहमित्यन्वयः किं तदित्याह ॥
दृशिस्वरूपमिति ॥ दृशिर्दृष्टिस्तत्स्वरूपं द्रष्टृत्वं तद्यस्य परमात्मस्वरूपस्य
तद्दृशीस्वरूपं सर्वसाक्षिस्वरूपमित्यर्थः ॥ तदुक्तं भगवता ॥ उपद्रष्टानुमं
ता च भर्ता भोक्ता महेश्वरः ॥ परमात्मेति चाप्युक्तो देहेस्मिन्पुरुषः पर इति ॥
पुनः किंरूपं तद्गगनोपमं गगनमुपमा दृष्टांतो यस्य तद्गगनोपमं गगन

वान्निर्लेपस्वरूपमित्यर्थः॥ तथाच भगवद्वचनं॥ यथासर्वगतं सौक्ष्म्या
दाकाशं नोपलिप्यते॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यत इति॥
एकं गगनोपमं गगनवदमूर्त्तस्वरूपमित्यर्थः॥ अकाशशरीरं
ब्रह्मेत्यादिश्रुतेः॥ पुनः कथंभूतं सकलद्विभातं॥ सकलदेकवदेव
विभातं सर्वदायेकस्वरूपेण भासमानं चंद्रादिप्रकाश
वन्न च वृद्धिक्षयशीलमित्यर्थः॥ पुनः किंरूपं अजं॥
जन्मरहितं एकं निरस्तसमस्तोपाधिभेदं॥ अक्षरं विश्व

सलिलना नुपरमान स्यदग्धपटन्यायेन प्रपंचभासेप्यद्वैतं सच्चित्तानंदलक्ष
णवस्तुभासनएवेत्यर्थः॥ तदुक्तं भगवता॥ वासुदेवः सर्वमिति समहात्मासु
दुर्लभइति॥ मूलकारोप्यस्मिन्नर्थे ग्रंथांतरसंवादं दर्शयति॥ तदुक्तं॥ दृशिस्वरू
पंगगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं॥ अलेपकं सर्वगतं यदद्वयं त
देवचाहं सततं विमुक्तमिति॥ यत्परं ब्रह्म तदेवाहमित्यन्वयः किं तदित्याह॥
दृशिस्वरूपमिति॥ दृशिर्दृष्टिस्तत्स्वरूपं दृष्टृत्वं तद्यस्य परमात्मस्वरूपस्य
तद्दृशीस्वरूपं सर्वसाक्षिस्वरूपमित्यर्थः॥ तदुक्तं भगवता॥ उपद्रष्टानुमं
ताचभर्ताभोक्तामहेश्वरः॥ परमात्मेतिचाप्युक्तो देहेस्मिन्पुरुषः परइति॥
पुनः किंरूपं तद्गगनोपमं गगनमुपमा दृष्टांतो यस्य तद्गगनोपमं गगन

नानाधर्मराहित्येन कूटस्थं स्वरूपमित्यर्थः॥ तथा च भगवानाह क्षरः सर्वाणि भू
तानि कूटस्थोऽक्षर उच्यते इति॥ अलेपकमसंगत्वादविद्यादिदोषरहितमित्यर्थः॥
असंगो ह्ययं पुरुष इति श्रुतेः सर्वगतं सर्वत्र ब्रह्मादिस्थावरान्तेषु भूतेषु गतं व्याप्तं
अद्वयं सजातीयविजातीयस्वगतभेदराहित्येन द्वितीयरहितं सततं विमुक्त
मिति सर्वदा कार्यकारणात्मकसर्वोपाधिविनिर्मुक्तत्वेन सततैकरूपमित्यर्थः
तथा च भागवते बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुत इति तथा च एतादृशं
निरतिशयानंदं परं ब्रह्म तदेवाहमिति भावयतो निषेधप्रतियोगित्वेन तत्त
दुपाधिना तत्प्रयुक्तभेदभावेप्यद्वैतं भासत एवेत्यर्थः॥ निर्विकल्पकसमाधि
स्वरूपमाह निर्विकल्पकस्तु ज्ञातृज्ञानादिविलयापेक्षयाऽद्वितीयवस्तुनि तत्त
दाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानं [illegible] यथा जलाकाराका
रितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारित

च्चित्तवृत्तेरनवभासेनाद्वितीयवस्तुमात्रमवभासते ततश्चास्य सुषुप्तेश्चाभेद
त्रं का न भवति उभयत्र वृत्त्यभा[illegible]ने समानेऽपि सद्भावासद्भावमात्रेण तयोर्भेदो
पपत्तेः अयं द्विविधः चिरकालाभ्यस्तपटुतरसविकल्पकसमाध्यनुभवजनितसं
स्कारसहकृततायाश्चित्तवृत्तेर्ज्ञातृज्ञानादित्रिपुटीलयपूर्वकमद्वैते वस्तुनि निश्चलीभा
वेनावस्थानात्मकः प्रथमः एतन्निर्विकल्पकसमाध्यभ्यासपाटवेन लुप्तसंस्का
रतया ज्ञात्रादित्रिपुटीलयपूर्वकमखण्डाकाराकारितायाश्चित्तवृत्तेर्विनापि स्व
स्फूर्तिकेवलानन्दात्मनावस्थानात्मको द्वितीयः तत्राद्वितीयपक्षमभिप्रे
त्याह ज्ञातृज्ञानादि[illegible]ति ननु एवं समाधिसुषुप्त्योर्विक्षेपाभावे वृत्त्यभाना
दभेदमाशंक्य परिहरति ततश्चेति तत्र युक्तिमाह उभयत्रेति समाधिसुषु
प्त्योरित्यर्थः। तत्सद्भावेति समाधावलीयमानवृत्तिसद्भावात् सुषुप्तौ च तदभा
वा[illegible]च्च तयोर्भेदोपपत्तेरित्यर्थः उक्तसमाधेः साधनापेक्षायामाह। अ

ष्टांगानि॥ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः तानिच साधनानिक्रमेणोद्दिशति यमनियमाद्यष्टांगानिसमाधेरंतरंगसाधनानी त्यर्थः प्रथमं यमस्यलक्षणमाह तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाय माः तेषुयमाद्यष्टांगेषुमध्येऽहिंसादयः पंचयमाः अवश्यानुष्ठेया इत्यर्थः तदनं

ना तरंनियममाह शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधाना॰ नियमाः शौचाद यः पंचनियमा इत्यर्थः आसनंलक्षयति॥ करचरणादिसंस्थानविशेषलक्ष णानिपद्मस्वस्तिकादीन्यासनानि॥ प्राणायामलक्षणमाह रेचककुंभपूरकल व

क्षणाः प्राणनिग्रहोपायाः प्राणायामाः इडयापूरयेद्वायुंमुंचेद्दक्षिणयाऽनिलं या ये

म्यांसंसमासीनः कुंभयेत्तंसुषुम्णाया यदायोगीपद्मासनेउपविश्ययोग मभ्यस्यंति तदागुल्फाभ्यांगुदमूलंनिष्पीड्यखेचरीमुद्रासहाय्येनप्राणधा रणायासुषुम्णामार्गेणमूलाधारात्कुंडलीनीमुत्थाप्यस्वाधिष्ठानमणिपूराना

पा॰।२

हृनविशुद्धाख्य[illegible]निर्वाणाख्यषट्चक्रभेदक्रमेण सहस्रदलकर्णिकायांविद्य
मानपरमात्मना सह संयोज्यते तत्रैव चित्तं निर्वातदीपवदचलं दृष्ट्वा स्वात्मा
नंदरूपं बतीयेत प्राणायाम फलं ॥ सचायं द्विविधः ॥ अगर्भः सगर्भश्चेति ॥ मुंचेद
क्षिणया वायुं मात्राहीनं च धीः पूरयेद्वामया तं कुंभयेच्च सुषुम्नया ॥ या वृद्धो
स्तं जितश्वासो भवेन्मासाज्जितेंद्रिय इति ॥ प्रणवोच्चारादित्यनेन [illegible]
[illegible]उक्तरेचकपूरककुंभकक्रमेण प्राणनिरोधोऽगर्भः प्राणायामः रेचये
त्षोडश प्रणवं मनसा स्मरन् दक्षिणया वायुं विरेच्य द्वात्रिंशत्संख्याकं प्रण
वं मनसा [illegible] समुच्चरन्वामया वायुमापूर्य चतुःषष्टिसंख्याकं प्रणवं मनसा
जपन्तदर्धमकार उकार मकारार्धमात्रा सक सार्धत्रिवल्याकार कुंडलि
नीरूपं चिदानंदकंदमूलादि ब्रह्मरंध्रांतमनुसंदधन्सुषुम्नया चिंतयम्
पितदेकप्रणवं कुर्वन्यावच्छ्वासं कुंभयेत् नदुक्तमाचार्यैः षोडशात् द्विगु
षोडशेनैव तद्द्विगुणेन पूरयेत् ॥ कुंभयेच्च चतुःषष्ट्या प्रणवार्थमनुस्मरन् इति वचनात्

णाच्च तुः षष्टि मात्राणि च नानि चक्रमशः रेचकपूरककुंभकभेदैः स्त्रिविधः प्रभंज
नायामः इति प्राणायामप्रकारः ॥ क्रमप्राप्तं प्रत्याहारं निरूपयति ॥ इंद्रियाणां
स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः ॥ श्रोत्रादीनामिंद्रियाणां स्वस्वविषये
भ्यः शब्दादिभ्यः सकाशात् पाषाणोपरि प्रयुक्तशरसंपातवत्प्रत्यावर्तनं प्रत्याहा
र इत्यर्थः ॥ नन्विंद्रियाणां स्वस्वविषयेभ्यो निवर्तनं प्रत्याहार इत्युक्तं तन्न सं
भवति ॥ शब्दादिविषयाणां सुखसाधनत्वेन वैषयिकसुखव्यतिरिक्तनित्य
निरतिशयानंदसद्भावे प्रमाणाभावात् ॥ हैरण्यगर्भाद्यमृतभोगस्य स्वरेणापि
त्यक्तुमशक्यत्वादिति चेन्न मूढैः कर्मजडैः विषयलंपटैः त्यक्तुमशक्यत्वेपि शु
द्धांतःकरणेन संसारविघ्नकत्वदर्शनाद्विषयदोषदर्शनेन तुच्छत्वतः शब्दादिवि
षयप्रपंचेन पुरुषोत्तमेन पुरुषवत्त्यक्तुं शक्यत्वात् अन्यथा संन्यास एव लो

री

लुप्येत॥ तस्मात्संन्यासमेषां तपसामतिरिक्तमाहुः॥ तमेव लोकमीप्सन्तः प्रव्रा-
त जिनः प्रव्रजंति॥ एतं सर्वभूःस्थाहि सपतु परित्यज्यात्मानमन्विछेत्॥ त्यागेनैके अ-
जे मृतत्वमानशुः॥ ब्रह्मचर्यादेव प्रव्रजेद्यदहरेव विरजेत्तदहरेव प्रव्रजेद्गृहाद्वा वना-
द्वा॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज॥ संसारमेव निःसारं दृष्ट्वा सारदि-
दृक्षया प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिताः॥ प्रसंगाद्विविदिषासिद्ध्यर्थे वे-
 दानुवचनादयोऽप्याश्रमा वाच्यास्तु न सागंरूपसंतीति श्रुतेर्बलात्॥ इत्यादिश्रुतिस्मृ- ५३
तिभिस्तथा॥ आनंदो ब्रह्मेति व्यजानात् एतस्यैवानंदस्यान्यानि भूतानि
मात्रामुपजीवंति॥ एषोऽस्य परमानंदः॥ आत्मैवानंदः यदेष आकाश आनंदो
न स्यात् आनंदाद्ध्येव खल्विमानि भूतानि इत्यादिश्रुतिभिः नित्यात्मसुख-
स्य प्रतिपादित्वात्॥ शब्दादिविषयकसुखव्यतिरिक्त निरतिशया

वा

नंदसंज्ञावेप्रमाणाभावादित्येतदपि निरस्तंबोद्धव्यं॥संप्रति धारणां लक्षय
ति॥अद्वितीयवस्तुन्यंतरिंद्रियावधारणं धारणा॥सर्वेषां बुद्धिसात्कृयावि
यमाने वस्तुनि चित्तनिक्षेपणं धारणेत्यर्थः॥धारणापाटवाभावे ना
नित्तस्थैर्याभावाद्द्वितीयवस्तुनि विच्छिद्यविच्छिद्य चित्तवृत्तिप्रवा
हीकरणं ध्यानमित्याह॥तत्राद्वीयवस्तुनि विच्छिद्यविच्छिद्यांतरिंद्रियवृत्ति
प्रवाहो ध्यानं समाधौरुक्त एव सविकल्पः स्मर्तव्य इत्याह॥समाधिस्तु
उक्तः सविकल्पक एव उक्तयमाद्यष्टांगसहितानिर्विकल्पकसमाधेर्निर्वि
घ्नानुष्ठानसिध्यर्थं विघ्नतान्यतिरेणविघ्ननिवारणस्य कर्तुमशक्य
त्वात्॥अस्य चतुरो विघ्नान्प्रदर्शयति॥एवमस्यांगिनो निर्विकल्प
कस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति॥

ली श्रि घ के

तत्राद्यं विघ्नं लक्षयति॥ लयस्तावत्॥ लयो द्विविधः चिरकालं उक्ताभ्यासरहितनिर्वि
कल्पैकसमाध्यभ्यासपाटवे नेति नमलो हतल[illegible]क्षिसनीराबिंदुवत्॥ तैलरहित
दीपकलिकावच्च प्रसंगाभिन्ने परमानंदे चित्तवृत्तेर्लयः प्रथमः॥ द्वितीयस्तु मूर्छावस्था
वत्॥ आलस्येन चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहादरे सति प्रसंगात्मस्वरूपा
नवभासनाद्वृत्तेः स्तब्धीभावलक्षणो निद्रारूपः तत्राद्यमंगीकृत्य द्वितीयस्य
विघ्नत्वेन तत्सागाय तत्स्वरूपमाह॥ अखंडवस्त्वनवलंबनेनाचित्तवृत्तेर्निद्रा॥
५४ द्वितीयं विभ्रमाह॥ अखंडवस्त्वनवलंबनेनाचित्तवृत्तेरन्यावलंबनं वि[illegible] ५४
[illegible]॥ [illegible] क्षेपः॥ अखंडवस्तुग्रहणाय यां तमुखतया प्रवृत्ता
याश्चित्तवृत्तेश्चिदनवलंबनेन त्रस्तपक्षिवत्पुनर्बाह्यविषयग्रहणाय प्र
वृत्तिर्विक्षेप इत्यर्थः॥ तृतीयं विभ्रमाह॥ लयविक्षेपाभावेपि चित्तवृत्तेः रा
गादिवासनास्तब्धीभावादखंडवस्त्वनवलंबनं कषायः॥ रागादयश्च

विधाः बाह्याभ्यंतरा वासनामात्ररूपाश्चेति ॥ बाह्याः पुत्रादिविषयाः अभ्यंतराः
मनोराज्यादयः संस्काररूपा वासनामयाः तत्रानेक[illegible]जन्माभ्यस्तबाह्या
भ्यंतररागाद्यनुभवजनितसंस्कारैः कलुषीकृतं रूपं चिद्दूषणादिसाध
नेनांतर्मुखमपि चेतन्यग्र[illegible]हणसामर्थ्याभावात् मध्य एव स्तब्धीभवति ॥
यथा राजदर्शनाय स्वगृहान्निर्गत्य राजमंदिरे प्रविष्टस्य कस्यचित्पुरुष
स्य द्वारपालकनिरोधेन स्त[illegible]ब्धीभावः तथा परित्यक्तबाह्यविषयस्याखंड
रा वस्तुग्रहणाय प्रवृत्तस्य [illegible]गादिसंस्कारैः स्तब्धीभावादखंडवस्त्वग्रहणे
कषायरूपो विघ्नः चतुर्थं विघ्नमाह ॥ अखंडवस्त्वनवलंबनेनापि चित्तवृत्तेः स
विकल्पकानंदास्वादनं रसास्वादः ॥ उक्तस्याविकल्पक[illegible]समाधाव्दलीयायः ॥
शब्दानुविद्धस्त्रिपुटीविशिष्टस्तस्मिन्नानंदो बाह्यशब्दादिविषयप्र
पंचभारत्यागप्रयुक्तो न तु चैतन्यप्रयुक्तो यथा निधिग्रहणाय प्रवृत्त

स्यनिधिपरिपालकभूत[स्य] प्रेताद्यावत्तस्य निधिप्राप्त्यभावेऽपि भूताद्यनिष्ट
निवृत्तिमात्रेण कोऽपि महानंदो भवति॥ तथा सविकल्पकसमाधावखंडव
स्त्वनवलंबनेनानिरस्यानंदरसास्वादनाभावेऽप्यनिष्टबाह्यप्रपंचनिर
त्तिजन्यानंदं सविकल्पकरूपं ब्रह्मानंदक्रमेणास्वादयति॥ तद्रसा ५५
स्वादनमिति स्पष्टः॥ लक्षणांतरमाह॥ समाध्यारंभसमये सविकल्प
५५ कानंदास्वादनं वा॥ निर्विकल्पकसमाध्यारंभकालेऽनुभूयमानसविक
ल्पकानंदस्यागासहिष्णुतया पुनस्तस्यैवास्वानंदरसास्वाद इत्यर्थः॥
प्रोक्तविघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखंड
चैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकसमाधिरुच्यते॥ तथा
ऽद्विष्टाभावसाहितं चित्तं यदा निर्वातदीपवदच[illegible]लमखंडचैत

५

स्वमात्रमवतिष्ठते तदा निर्विकल्पकसमाधिरुच्यते॥ सर्पः लयादिविघ्नसङ्ग
वेतभिरन्तिप्रकारेन्न गौडसम्मतिमाह॥ लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पु
नः सकषायं विजानीयात् समप्राप्तं न चालयेत्॥ नास्वादयेद्रसं तत्र निःसंगः
प्रज्ञया भवेत्॥ पूर्वोक्तानेकालक्षणे लये जाते सति तन्निरसर्थं चित्तं संबोध
येत्॥ चित्तगतजाड्यादिपरित्यागेन चित्तमुद्बोधयेत्॥ उक्तविक्षेपयुक्तं चि
त्तं यदा भवति तदा विषयवैराग्यादिना चित्तं शमयेत्॥ बहिर्मुखतापरित्य
ज्यान्तर्मुखं कुर्यात्॥ उक्तरागादिकषायसहितं चित्तं यदा भवेत् तदा विजानी
यात् इयं रागादिवासना बाह्यविषयप्रापिका न त्वखण्डवस्तुप्रापिका अ
तो नेयं समीचीनेति विविच्य प्रत्यक्प्रवणः वासनायाः सकाशात् रागादियं
निरूपाल स्यान्न्येयमिति जानीयादि सर्पः यदा सम्यग्वस्तुन्यप्रा

यच्चित्तं यदा भवति तदा चित्तं सकषायं कषायसहितं विजानीयात्॥ तच्चित्तं यावत्कालेन रागादिवासनाक्षयसहितं भवति तावत्कालं तच्चित्तं स्वस्थानान्न चालयेत्॥ न कषयेत्। वासनाक्षयानंतरं चित्तं स्वत एव प्रसन्नं भवतीत्यर्थः॥ नास्वादयेत् इति पूर्वोक्तं सविकल्पकं रसं विषयप्रपंचे भोगत्यागजन्यं नास्वादयेत्तत्रानुभावेत्तत्र युक्तिमाहनिःसंगईति॥ यतो निःसंगो वैषयिकसुखदुःखादिसंगरहितः अतः प्रज्ञया युक्तो भवेत् स्थितप्रज्ञो भवेदित्यर्थः तदुक्तं भगवता॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्॥ आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते इति॥ तस्माल्लयादिविघ्नाभावे निरुद्धस्य चित्तस्य चिन्मात्रतयावस्थानं निर्विकल्पकसमाधिरित्यर्थः॥ तत्र भगवानाह यथा दीपो निवातस्थो नेंगते सोपमा स्मृतेति अथ निर्विकल्पकस

माधौ स्वगुरूपदिष्टमार्गेण यथामति किंचिद्विचार्यते॥ पंचभूमिकोपेतस्य चित्तस्य भूमि
कात्रयपरित्यागेनावशिष्टभूमिकाद्वयं समाधिरित्युच्यते का स्ताः पंचभूमिकाः
क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धं चेति पंच चित्तभूमिकाः तत्रासुरसंपच्छोरण
स्वदेहवासनासु वर्तमानं चित्तं क्षिप्तमित्युच्यते निद्रातंद्राद्यिग्रस्तं चित्तं मूढमि
त्युच्यते कदाचित्कध्यानयुक्तं बहिर्गमनशीलं क्षिप्ताद्विशिष्टतया विक्षि प्त
प्तचित्तमित्युच्यते तत्र क्षिप्तमूढयोः समाधित्वशंकैव नास्ति विक्षिप्ते तु चेतसि
विक्षेपांतर्गततया दहनांतर्गतबीजवच्चित्तस्य सद्य एव विनाशात्तदापि न समाधिः मा
एकाग्रतां पातंजलिः सूत्रयति शांतोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता प
रिणाम इति अस्यार्थः शांतोऽतीतः उदितो वर्तमानः प्रत्ययश्चित्तवृत्तिः अ
तीतप्रत्ययो यं पदार्थं परिगृह्णाति उदितोऽपि तमेव गृह्णीयात्तदावुभौ तुल्य
तौ

वै.दां.सू.   २.सु.

जो गुणनिरोधायक्रीयमाणेन प्रयत्नविशेषेण दिनेदिने योगिनः सर्वार्थताक्षीयते एकाग्र ८

प्रसयोभवतः तादृक् एव चित्तस्य परिणाम एकाग्रतेत्युच्यते एकाग्रताभिवृद्धिल

क्षणंसमाधिं सूत्रयति सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य परिणामः समाधिरि   ५७

ति रजोगुणेन चाल्यमानं [illegible] चित्तं क्रमेण सर्वार्थान्गृहीत्वा

ति तस्यरतान्वोदेति तादृक् चित्तस्यपरिणामः समाधिरित्यर्थः अस्य समाधेरष्टां

गेषु यमनियमासनप्राणायामप्रत्याहाराः पंचबहिरंगा निर्हिंसादिभ्यो निषिद्धेभ्यो

योगिनं कर्मभ्यो यमयंति निवर्तयंति प्रेरयंति शौचादयो नियमाः यमनियमयो   ली

ते   रनुष्ठाने वैगुण्यं स्मर्यते यमान्सेवेत सततं न नित्यं नियमान्बुधः यमान्पतत्य

कुर्वाणो नियमान्केवलान्भजन्निति बुध्वा यमनियमयोः सामीप्ये यमबहुलेषु प्रयत्ने

बुबुद्धिमनुसंदधीत आसनप्राणायामप्रत्याहारा व्याख्याताः धारणाध्या   ५७

नसमाधित्रयं मनोविषयत्वात्संप्रज्ञातसमाधेरंतरंगं यमादिकं तु बहिरंगं॥

६

तथाचैकेनापि पुण्येनांतरंगं प्रथमं लब्ध्वे सति बहिरंगलाभाय नातिप्रयासः कर्तव्यः
यद्यपि पतंजलिना भौतिक भूततन्मात्रेंद्रियाहंकार विषयाः संप्रज्ञातसमाधयो ब
हुधा प्रपंचिताः॥ तथापि तेषामर्थोत्तेनाकाशगमनादि सिद्धिहेतुत्वान्मुक्तिहेतु
समाधिविरोधित्वान्नास्माभिस्तत्रादरः क्रियते॥ तथाचोक्तं॥ वसिष्ठराम संवादे॥
श्रीराम उवाच॥ जीवन्मुक्तशरीराणां कथमात्मविदां वर॥ शक्तयो नेह दृश्यंते आका
शगमनादिकाः॥ वसिष्ठ उवाच॥ अनात्मविदमुक्तोपि सिद्धिजालानि वांछति॥
द्रव्यमंत्रक्रियाकालयुक्त्याप्नोत्येव राघव॥ नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्ममात्र
दृक्॥ आत्मनात्मनि संतुष्टो नाविद्यामनुधावति॥ ये केचन जगद्भावास्तानवि
द्यामयान्विदुः कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति॥ द्रव्यमंत्रक्रि
याकालयुक्तयः साधुसिद्धिदाः॥ परमात्मपदप्राप्तौ नोपकुर्वंति काश्चनेति॥

ऽत्मविषयस्तु संप्रज्ञातसमाधिर्वासनाक्षयस्य निरोधसमाधेश्च हेतुस्तस्मात्तत्रादरः

५८ कृतः। अतः पंचभूमिकारूप [illegible] निरोधलक्षणः समाधिर्निरूप्यते। तं च समाधिं सूत्र

यति व्युत्थाननिरोधसंस्कारयोः [illegible] रभिभवप्रादुर्भावौ निरोधलक्षणाचित्तान्वयो

निरोधपरिणाम इति॥ व्युत्थानसंस्काराः समाधिविरोधिनः। ते च निरोधे स्तुनो

योगिप्रयोगप्रयत्नेन प्रतिदिनं प्रतिक्षणं चाभिभूयंते। तद्विरोधिनश्च संस्काराः प्रा

क दुर्भवंति। तथा सति निरोध एकैकस्मिन्क्षणे चित्तमनुगच्छति। सोयमीदृशश्चित्तस्य प श्च

रिणामो भवति। यदा तदा त्वसंप्रज्ञातसमाधिरित्युच्यत इत्यर्थः॥ एतत्समाधि

द्वयं जीवन्मुक्तस्यैव संभवति। नान्यस्येति॥ मननादि निधाय प्रथमं जीवन्मुक्त ५८

स्वरूपं प्रतिपादयितुं प्रतिजानीते॥ अथ जीवन्मुक्तलक्षणमुच्यत इति॥ तस्य लक्षण

माह॥ जीवन्मुक्तो नाम स्वादीनां ब्रह्मनिष्ठ इत्यंतेन॥ जीवन्मुक्तो नाम स्वस्वरूपा

खंडब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखंडब्रह्मणि साक्षात्कृते।

अज्ञानतत्कार्यसंचितकर्मसंशयविपर्ययादीनामपि बाधित्वाद्‌खिलबंधरहितो ब्रह्मनिष्ठः॥१
अज्ञाखिलबंधरहितो ब्रह्मनिष्ठो जीवन्मुक्त इति तस्य लक्षणं॥ जीवतः पुरुषस्य कर्तृत्व
भोक्तृत्वसुखदुःखलक्षणो खिलोयश्चित्तधर्मः सक्लेशरूपत्वाद्बंधो भवति गतेनरहि
तः परित्यक्तबंधनः ब्रह्मणि निष्ठा तदेकपरता यस्य स ब्रह्मनिष्ठः सन्जीवन्मुक्त इ
त्यर्थः सकलबंधराहित्ये हेतुमाह॥ स्वस्वरूपे [illegible]ति॥ गुरुश्रुतिस्वानुभवैर्ब्रह्मात्मै
कत्वज्ञानेन मूलाज्ञानतत्कार्यसंचितकर्मादीनामपि बाधितत्वात्सर्वबंध
राहित्यमुपपद्यत इत्यर्थः॥ तथा च श्रुतिः भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशा
याः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति॥ ननु येनाहृतास्य जीवन्मु
क्तस्य देहेंद्रियादिप्रपंचभानमस्ति॥ न वेत्याशंक्य दग्धपटन्यायेन दृढज्ञा
नेन निर्मितसोधसमुद्रादिवच्च बाधितानुवृत्या मिथ्यात्वेन भानेपि परमा

र्थतया भानेनेत्याह॥ अयमित्यादिना न पश्यतीत्यंतेन अयं तु सुषुप्तानसमये
मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणांध्यमांद्यपटुत्वादिनाभाजनें
द्रियग्रामेणाशनापिपासाशोकमोहादिभाजनेनांतःकरणेन च पूर्वपूर्ववा
सनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च
पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति॥ यथेंद्रजाल [illegible]
[illegible] पश्यति॥ यथेंद्रजालमपि ज्ञान
वान् तदिदमिंद्रजालं पश्यन्नपि परमार्थमपि न पश्यति॥ अस्मिन्नर्थे श्रुति
माह॥ सचक्षुरचक्षुरिव सकर्णोऽकर्ण इत्यादिश्रुतेः॥ आचार्यवचनं प्रमाण
यति॥ उक्तं च॥ सुषुप्तवज्जाग्रति यो न पश्यति द्वयं तु पश्यन्नपि चाद्वयत्वतः॥

तथापि कुर्वन्नपि निष्क्रियः स्वयं स आत्मविन्नान्य इतीह निश्चयः॥ इहजगति
स एव आत्मविज्जीवन्मुक्तो नान्य इति मे निश्चय इत्यन्वयः॥ सोऽक इत्यपेक्षायामाह॥
य इति॥ यः कोपि महापुरुषो ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धिः
सुषुप्तावस्थायां यथा द्वैतं न पश्यति॥ तथा ब्रह्मदृष्टिदार्ढ्येन जाग्रदवस्थायामपि
द्वैतं न पश्यति॥ न दृष्टा ब्रह्मव्यतिरिक्तजडपदार्थाभावात्स तथोक्तः॥ किंच कदाचिद्व्यु
त्थानदशायामविद्यासंस्कारलेशवशाद्भिक्षाटनादिव्यवहारेण द्वैतं पश्यन्नपि समा
ध्यभ्याससामर्थ्यवशात् अद्वयत्वेन पश्यति॥ स च तथोक्तः॥ यश्च लोकसंग्रहार्थं नि
त्यादिकर्माणि कुर्वन्नप्यात्मनि कर्तृत्वाभावनिश्चयेन निःक्रियः कर्मरहितो भवति
कर्मफलेन न लिप्यते स जीवन्मुक्तो नात्र संशयः कर्तव्य इत्यर्थः॥ ननु तस्य जीवन्मु
क्तस्य योगीश्वरस्य मम पुण्यपापलेपो नास्तीत्यभिमानवशाद्यथेष्टाचरण प्रसं

व

130

गमाशंक्य परिहरति॥ अस्यज्ञानात्पूर्वं विद्यमानानामेव आहारविहारादीनामनु
वृत्तिवच्छुभवासनानामप्यनुवृत्तिर्भवति॥ अस्य पूर्वोक्तजीवन्मुक्तस्य ज्ञानात्प्रा
गेव शांत्यादिगुणैरशुभवासनाया निवारितत्वात्संसारदशायामप्रयत्नेनाहा
रादिप्रवृत्तिवत्तत्वज्ञानोत्तरमपि शुभानामेव वासनानामनुवृत्तिर्भवति॥ नो
६० शुभानामित्यर्थः॥ ननु शुभवासनानुवृत्तेरपि प्रयोजनाभावात् किं तदनुवृत्तेरित्य ६०
त आह॥ शुभाशुभयोरौदासीन्यं॥ तस्माज्जीवन्मुक्तस्य यथेष्टाचरणप्रसंगो ना
स्तीति भावः॥ अस्मिन्नर्थे ग्रंथांतरं संवादयति॥ तदुक्तं॥ बुद्धाद्वैतसतत्वस्य यथेष्टा
चरणं यदि॥ शुनां तत्वदृशां चैव को भेदोऽशुचिभक्षणे इति॥ जीवन्मुक्तस्य ब्रह्म
ज्ञानत्वाभिमानो नास्तीत्यत्रापि संमतिमाह॥ ब्रह्मवित्वं तथा मुक्त्वा स आत्मज्ञो दै
न चेतर इति॥ ननु विदुषां यथेष्टाचरणप्रसंगो नास्तीत्युक्तं तदनुपपन्नं नमा

तत्रापि तत्त्वबोधस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वापि स इमांल्लोकान्न
हंति न निबध्यते ॥ हयमेधसहस्राण्यथ कुरुते ॥ ब्रह्महत्यादिघातलक्षाणि ॥ परमार्थ
विन्न पुण्यैर्न च पापैः स्पृश्यते मनुजः ॥ अश्वमेधसहस्राणि ब्रह्महत्याशतानि च ॥
प कुर्वन्नपि न लिप्येत यद्येकत्वं प्रपश्यति ॥ स भयाद् भयं प्राप्नुस्तल्लक्ष्यं यत्नेन च यः ॥
स पुनः स भयं गंतुं स्वतंत्रश्चेन्न हीच्छति ॥ आरब्धकर्मनानात्वाद्बुधानामन्यथा
न्यथा ॥ वर्तनं तेन शास्त्रार्थे विभ्रांतव्यं न पंडितैरित्यादिश्रुतिस्मृतिभिर्युक्त
वाक्यैर्विदुषां यथेष्टाचरणं तांगीकारादिति चेत् सत्यं ॥ तेषां वचनानां विद्वत्स्तुति
परत्वेन तत्कर्तव्यमित्यत्र तात्पर्याभावात् ॥ तदुक्तमाचार्यैः ॥ अधर्मो ज्ञायते
ज्ञानं यथेष्टाचरणं ततः ॥ धर्मशास्त्रार्थरूपं तस्याधत्र धर्मोऽपि नेष्यत इति ॥ नन्वेव
ममानित्वमदंभित्वमहिंसा क्षांतिरार्जवमित्यादिस्मृतियुक्तसाधनस्याद्वेष्टा सर्व

१३२

भूतानामित्यादिवचनैः प्रतिपाद्यमानाद्वेष्टृत्वादिगुणसमूहस्यच विदुषां संपाद्यमा
नत्वश्रवणात्तेन सह विरोधमाशंक्यामानित्वादिसंपादनस्य विविदिषासंन्यासवि
षयत्वात् द्वेषानुलक्षणत्वेनालंकारवदनुवर्त्तमानो न विरोध इत्याह॥ इदानीममा
नित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालंकारवदनुवर्तन्ते॥ जीवन्मु
क्तावस्थायामित्यर्थः॥ अस्मिन्नर्थे वार्तिकसंमतिमाह॥ तदुक्तं॥ उत्पन्नात्माव
बोधस्य ह्यद्वेष्टृत्वादयो गुणाः॥ अयत्नतो भवंत्यस्य न तु साधनरूपिण इति॥ अ
स्य विद्वत्संन्यासिनो जीवन्मुक्तस्याद्वेष्टृत्वादयो गुणाः ~~[illegible]~~॥
अयत्नतः अप्रयासेनस्वत एव भवंति॥ न तु साधनरूपिणस्तं प्रतीते न तु साध
नरूपाः न भवंति॥ तत्र हेतुमाह॥ उत्पन्नेति॥ यतः उत्पन्नः आत्मावबोधो ब्र
ह्मात्मैकत्वनिश्चयरूपः तत् तस्य ते गुणाः लक्षणत्वेनैव भवंतीत्यर्थः॥ इयता प्र

बंधेन प्रतिपादिते ऽस्मिन् वेदांतसाराख्ये ग्रंथे श्रीमत्परमहंसपरिव्राजकाचा
र्य श्रीस[illegible]दानंदयोगींद्रेण महापुरुषेणाद्यो वेदांतो नामेत्या[illegible]रभ्य साधनचतु
ष्टयसंपन्नस्य प्रमातुरधिकारिणो मूलाज्ञाननिवृत्तिपरमानंदप्राप्तिसिद्धये
स्प प्रतीयमानाविद्या सकलप्रपंचजातं ब्रह्मण्यध्यारोपापवादपुरःसरं निःप्रपंचं
प्रतिपाद्य तत्साधनं श्रवणादिकं सप्रपंचमभिधाय तस्यैवाधिकारिणस्तत्व
मस्यादिवाक्यश्रवणानंतरं ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धेः
जीवन्मुक्तत्वं दर्शितं ॥ एतावतैव कार्यसिद्धेः किं बहुलेखनेनेति मनसि निधाय ग्रंथ
समाप्त्ययस्य जीवन्मुक्तस्य स्वप्रकाशानंदानुभवैकनिष्ठस्य भेदप्रतीत्यभावे
प्यविद्यालेशवशात्प्रारब्धकर्म भुंजानो भिक्षाटनादि देहयात्रामात्रार्थे मिछा
त्र क्रियावशिष्टो ऽकर्मी भूत एवावतिष्ठत इत्युपसंहरति किं बहुनेत्यादिना। किं बहुना यं देहया०

णा

निच्छापरेच्छार्पितानि सुखदुःखलक्षणानि प्रारब्धफलानि अनुभवन् अन्तःकरणाभा
सादीनामवभासकः सन् तदवसाने प्रत्यगानन्दे परब्रह्मणि प्राणे लीने सति अज्ञानत
त्कार्यसंस्काराणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासर
हितमखण्डं ब्रह्मावतिष्ठते ॥ प्रारब्धं त्रिविधं स्वेच्छाकृतं परेच्छाकृतं अनिच्छाकृतं
चेति ॥ व्युत्थानदशायां ईश्वरप्रेरिततया स्वकीयेच्छाकृतं व्युत्थानदशायां वा आ
काशफलपातवदकस्माज्जायमानं पाषाणपतनकंटकवेधादिकमनिच्छाकृतं ॥ त
थाचायं जीवन्मुक्तस्त्रिविधं प्रारब्धप्रापितं सुखदुःखमनुभवन् बुध्यादिसाक्षि
तया सर्वावभासकः सन् भोगेन आरब्धकर्मक्षये सति प्रत्यगभिन्नपरमात्मनि प्रा
णादिलयानन्तरं प्रणष्टाविद्याकसंस्कारः कृतकृत्यः सन् गलितसकलभेदप्रति
भासो ब्रह्मैवावतिष्ठते ॥ इति सकलवेदरहस्यतात्पर्यमित्यर्थः ॥ अयं जीवन्मुक्तो बुध्या

क्रो

घुपाधिविनिर्मुक्तोऽपि जीवन्मुक्त इत्युपचाराद्व्यवहारभाक् भवति। बद्धत्वस्याप्यवास्त
त्वात्॥ तदुक्तमाचार्यैः॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः॥ न मुमुक्षुर्न वै मु
क्तः इत्येषा परमार्थतेति॥ अस्य जीवन्मुक्तस्योपाधिविगमसमये प्राणा स्वलिंग
शरीरमिति... त प्रलोहतप्तोदकबिंदुवत् प्रत्यगभिन्नपरमानंदे लीनत्वात्।
स्थूलशरीरान्नोत्तिष्ठंतीत्यत्र श्रुतिमाह॥ न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते द
विमुक्तश्च विमुच्यत इत्यादि श्रुतेः॥ अयं जीवन्मुक्तो जीवन्नेव दृश्यमानाद्रागद्वेषा
दिबंधनात् विशेषेण मुक्तः सन् वर्तमानदेहपाते सति भावीदेहबंधाद्विशेषेण मु
च्यत इत्यत्रार्थे श्रुतिमाह॥ विमुक्तश्चेति बृहदारण्यकेयदा सर्वे मुच्यंते॥ कामाये
स्य हृदि स्थिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति वाशिष्ठेऽपि॥ जीवन्मु
क्तपदं त्यक्त्वा स्वदेहे कालसात्कृते न भवत्यदेहमुक्तत्वं पवनोऽस्पंदतामिति॥ अ

संगो ह्ययं पुरुष इति आकाशवत्सर्वगतश्च नित्यः अस्नाविरं शुद्धमपापविद्धमित्या
दिश्रुत्या प्रत्यगात्मनो नित्यत्वपरिपूर्णत्वकूटस्थत्वशुद्धत्वश्रवणात्॥ उत्पत्त्या
दिविलक्षणसंस्कारश्चतुर्विधक्रियाफलविलक्षणत्वेन विषयानित्यरतिमात्रेणप्रा
प्त एवात्मा पुनः प्राप्त इत्युपपद्यते॥ अधिष्ठानस्य गमनाभावेऽध्यस्तस्य लोकां
तरगमनायोगाद्ब्रह्मलोकादिमुक्तिसंभवः न त्वप्राप्तस्य क्रियासाध्यस्य व
स्तुनो विद्यमानानर्थनिवृत्तेश्च पुरुषार्थसंदृष्टमत्र तदभावात्कथं पुरुषा
र्थत्वमिति चेत्॥ तयोरेव पुरुषार्थत्वमिति नियमाभावात् स्वच्छायाया
मारोपितदशमस्य विस्मृतस्य कंठगतचामीकरस्य भ्रांतपुरुषस्य आप्तवा
क्येन तयोर्निवृत्त्या प्राप्त्योरपि पुरुषार्थत्वदृष्टेः अत्र संग्रहः आत्मज्ञानेन म
लं निरस्तममलं प्राप्यं च तत्त्वं परं कंठस्थहेमाभरणादिवद्दशमवद्गुगच्छाया

137

पि न्नगचीयथा॥ अत्र सोऽस्माभिर्निवृत्तिवक्षु तिशिरोवाक्याकुरोरूहस्याल्लब्धस्तध्वांत
निरासनः परसुखप्रासं नयोरूच्यत इति॥ नच मुक्ता[illegible]नामोपदेशसिद्धभीष्मप्रभृतीना
मप रोक्षज्ञानीनां पुनर्देहांतरश्रवणात्केवलज्ञानिनां तत्समय एवात्यतानानामस्मा
कं मुक्तिर्भवतीति कथं विश्वसिम॥ आत्मज्ञानव्यतिरिक्तमन्यत्प्रयोजनं किंचित्कर्तव्य मु
मितिवाच्यं शास्त्रप्रामाण्यादेवतदुपपत्ते॥ अंतवेद्वं हैव भवति नरात्तदात्मैकमा
त्मानं विदुषामिज्ञानोत्पत्तिसमय एव मुक्तिप्रतिपादनात्॥ तदुक्तं श्रीशेषेण॥ तीर्थे श्वपच
गृहे वा नष्टस्मृतिरपि परित्यजन्देहं॥ ज्ञानसमकालमुक्तः कैवल्यं याति हतशो
८ दी + क इति॥ वसिष्ठादीनां त्वाधिकारिकपुरुषत्वेन यावदधिकारमारब्धवेगयुक्तशापा
दीनां स्वीकृतावांतरदेहपालेपितदेहभाविभोगस्य निवारयितुमशक्यत्वात् आरब्ध
स्य विना भोगेन क्षयानुपपत्तेः यावदधिकारमवस्थितिराधिकारिकाणामिति भग
वत्पादैर्विशेषितत्वात्॥ अस्मदादीनां च आरब्धकर्मणो नैकदेहारंभकत्वसंभवेप्यि
ते

चरमदेहं विना परोक्षज्ञानोत्पत्तेरसंभवात् ॥ वामदेवे तथा दृष्टत्वात् ॥ अन्यथा ग
र्भस्थस्य श्रवणाद्यभावेन ज्ञानोत्पत्त्यनुपपत्तेः ॥ ननु ज्ञानिनामपि स्वभावस्थापा
देहांतरस्वीकरणवन्मुक्तानामपि पुनर्देहांतरस्वीकारः किं न स्यादिति चेन्न [illegible]
स्वभः समाविशेदित्यादिवाक्येषु कंठान्निर्गमनाभावश्रवणात् ॥ देहांतरप्राप्तस्तु
तद्देहांतरप्रतिपत्तावित्यत्र देहान्निर्गमनश्रवणाद्वैषम्यं ॥ तदुक्तं स्कांदे ॥ यस्मिन्देहे इ
दं ज्ञानमपरोक्षं विजायते ॥ तद्देहपातपर्यंतमेव संसारदर्शनं ॥ पुंसोऽपि नास्ति सं
सारदर्शनं परमार्थतः ॥ कथं तद्दर्शनं देहविनाशादूर्ध्वमुच्यते ॥ तस्माद्ब्रह्मात्मवि
ज्ञानेद्धं चरमविग्रहे ॥ जायते मुक्तिदं ज्ञानं प्रसादादेव मुच्यते ॥ इति ॥ तस्मात्तु शु
त्तो विमुच्यत इति ॥ नित्यशुद्धपरिपूर्णमद्वयं सच्चिदात्मकमखंडमक्षरं ॥ सर्वदा
सुखमबोधनत्वैर्वर्जितं सदहमस्मि तत्परं ॥ गोवर्द्धनशरणाय विमुक्तये त्रैप
।

नु

विन्ने नरसिंहयोगी ॥ वेदांतसारस्य च भारती मां सुबोधिनी विश्वपतेः पुरस्तात् ॥
जाते पंचदशाधिके दशशते संवत्सराणां पुनः संजाते दश वत्सरे घृणिपुरे श्रीशालि
वाहे शाके ॥ विश्वावसुवत्सरे शुभशुचौ मासे नुमत्यां तिथौ प्रातर्भार्गववासरे न
रहरिसिंहीं भाष्य भारोज्ज्वलां ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्री
म[illegible]नंदभगवत्पूज्यपादशिष्य नरसिंहसरस्वती कृता वेदांतसार
टीका सुबोधिनी समाप्ता ॥ ॥ शके १७१५ प्रमादी संवत्सरे वैशाख शु
कुल तीयायां इदं श्री[illegible] पुस्तकं टेंइल्पुपनाम मुकुंदात्मज स
खाराम[illegible] स्वपठनार्थं लिखितापराधं वा ॥ श्रीः ॥ श्रीः ॥ श्रीः

सा. ति. सु.

पदार्थनिरूपणे कर्तव्ये लक्ष्यं किं लक्ष्यतावच्छेदकं किं लक्षणं किं ॥ पदार्थो लक्ष्यः पदार्थत्वं लक्ष्यतावच्छेदकं अभिधेयत्वं पदार्थसामान्यलक्षणं ॥ यस्य लक्षणं क्रियते तल्लक्ष्यं ॥ लक्षणस्य धर्मो लक्ष्यता लक्ष्यतायाः अवच्छेदकं लक्ष्यतावच्छेदकं ॥ अन्यूनानतिरिक्तवृत्त्यवच्छेदकं ॥ असाधारणधर्मो लक्षणं । लक्ष्यतावच्छेदकं समनियतत्वं असाधारणत्वं । लक्ष्यतावच्छेदकव्यापकत्वे सति लक्ष्यतावच्छेदकव्याप्यत्वं लक्ष्यतावच्छेदकसमनियतत्वं ॥ न्यूनदेशवृत्तित्वं व्याप्यत्वं । अधिकदेशवृत्तित्वं व्यापकत्वं ॥

६५

॥ इति वेदांतसारस्य टीका नाम्ना सुबोधिनी ॥

६५

पु. २१

141

[OrderDescription]
,CREATED=28.09.20 16:44
,TRANSFERRED=2020/09/29 at 10:42:52
,PAGES=141
,TYPE=STD
,NAME=S0003752
,Book Name=M-1701-VEDANTSAR SUBODHINI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,